ओं नमः परमात्मने, श्री महागणपतये नमः

श्री गुरुभ्यो नमः

ह॒रि॒ः ओं

# कृष्ण यजुर्वेदीय तैत्तिरीय आरण्यकम्

## प्रपाठकः 5 - 6

## शीक्षा वल्ली
## ब्रह्मानन्द वल्ली
## भृगु वल्ली
## महानारायणोपनिषत्

Version 1.0 March 31, 2020

# Table of Contents

5 कृष्ण यजुर्वेदीय तैत्तिरीय आरण्यके – पञ्चमः प्रपाठकः......................8
5.1 पञ्चमः प्रपाठकः – शीक्षा वल्ली........................................8
अनुवाकं – 1........................................................................8
अनुवाकं – 2........................................................................8
अनुवाकं – 3........................................................................9
अनुवाकं – 4........................................................................10
अनुवाकं – 5........................................................................12
अनुवाकं – 6........................................................................13
अनुवाकं – 7........................................................................14
अनुवाकं – 8........................................................................14
अनुवाकं – 9........................................................................15
अनुवाकं – 10......................................................................16
अनुवाकं – 11......................................................................16
अनुवाकं – 12......................................................................18
ब्रह्मानन्द वल्ली........................................................................19
अनुवाकं – 13......................................................................19
अनुवाकं – 14......................................................................19
भृगु वल्ली..............................................................................29
अनुवाकं – 15......................................................................29
6 कृष्ण यजुर्वेदीय तैत्तिरीय आरण्यके षष्ठः प्रपाठकः.......................................39
6.1 षष्ठः प्रपाठकः – महानारायणोपनिषत्..................................39

अनुवाकं – 1 ............ 39
Special Korvai ............ 51
Special Korvai ............ 51
अनुवाकं – 2 ............ 52
अनुवाकं – 3 ............ 53
अनुवाकं – 4 ............ 53
अनुवाकं – 5 ............ 54
अनुवाकं – 6 ............ 54
अनुवाकं – 7 ............ 54
अनुवाकं – 8 ............ 55
अनुवाकं – 9 ............ 55
अनुवाकं – 10 ............ 55
अनुवाकं – 11 ............ 55
अनुवाकं – 12 ............ 56
अनुवाकं – 13 ............ 58
अनुवाकं – 14 ............ 60
अनुवाकं – 15 ............ 61
अनुवाकं – 16 ............ 61
अनुवाकं – 17 ............ 62
अनुवाकं – 18 ............ 62
अनुवाकं – 19 ............ 63
अनुवाकं – 20 ............ 63
अनुवाकं – 21 ............ 63
अनुवाकं – 22 ............ 63
अनुवाकं – 23 ............ 64

अनुवाकं – 24 ........ 64
अनुवाकं – 25 ........ 64
अनुवाकं – 26 ........ 64
अनुवाकं – 27 ........ 65
अनुवाकं – 28 ........ 66
अनुवाकं – 29 ........ 66
अनुवाकं – 30 ........ 66
अनुवाकं – 31 ........ 67
अनुवाकं – 32 ........ 67
अनुवाकं – 33 ........ 68
अनुवाकं – 34 ........ 68
अनुवाकं – 35 ........ 68
अनुवाकं – 36 ........ 69
अनुवाकं – 37 ........ 70
अनुवाकं – 38 ........ 70
अनुवाकं – 39 ........ 70
अनुवाकं – 40 ........ 71
अनुवाकं – 41 ........ 72
अनुवाकं – 42 ........ 73
अनुवाकं – 43 ........ 73
अनुवाकं – 44 ........ 73
अनुवाकं – 45 ........ 74
अनुवाकं – 46 ........ 74
अनुवाकं – 47 ........ 74
अनुवाकं – 48 ........ 75
अनुवाकं – 49 ........ 75

अनुवाकं – 50 ........................................................................75
अनुवाकं – 51 ........................................................................75
अनुवाकं – 52 ........................................................................76
अनुवाकं – 53 ........................................................................76
अनुवाकं – 54 ........................................................................76
अनुवाकं – 55 ........................................................................76
अनुवाकं – 56 ........................................................................77
अनुवाकं – 57 ........................................................................77
अनुवाकं – 58 ........................................................................77
अनुवाकं – 59 ........................................................................77
अनुवाकं – 60 ........................................................................78
अनुवाकं – 61 ........................................................................78
अनुवाकं – 62 ........................................................................79
अनुवाकं – 63 ........................................................................79
अनुवाकं – 64 ........................................................................79
अनुवाकं – 65 ........................................................................80
अनुवाकं – 66 ........................................................................81
अनुवाकं – 67 ........................................................................82
अनुवाकं – 68 ........................................................................83
अनुवाकं – 69 ........................................................................84
अनुवाकं – 70 ........................................................................85
अनुवाकं – 71 ........................................................................86
अनुवाकं – 72 ........................................................................86
अनुवाकं – 73 ........................................................................86
अनुवाकं – 74 ........................................................................86
अनुवाकं – 75 ........................................................................87

अनुवाकं – 76 ........................................................................87
अनुवाकं – 77 ........................................................................87
अनुवाकं – 78 ........................................................................87
अनुवाकं – 79 ........................................................................ 89
अनुवाकं – 80 ........................................................................93

====================================

# Version Notes

## 1st Version Number 0.0 dated 18th January 2018

## 2nd and Current Version Number 1.0 dated 31st March 2020

1. This Version replaces earlier version "0.0" dated January 18, 2018.

2. We have marked '||" (double ruk) at the end of vedic statements based on the book released under "Anandashram Series on TaittirIya Brahmanam containing bashya of Scholar Sayanacharya, 3d Edition published in 1979.

3. We have standardised some of the conventions and formatted this compilation to make reading easier.

We have/shall include Paata Bhedams in brackets wherever found applicable to the best of our efforts.

**Important Note:**

There are two versions of Mahanarayana Upanishad (Prapaatkam 6) of TaittirIya Aranyakam compiled from distinct sources (Schools/Sakha).
We have **provided the longer version** of this as available in the book containing the **work of Shri Sayanacharya** as many of the members of the Group have been taught by their respective Gurus.

The Books containing the work of Shri Bhatta Bhaskaracharya Misra contains the shorter version. Contemporary book published by Shri Nrusimhachari Trust, Chennai also reflects this shorter version. The Scholar who compiled the work of Shri Sayanacharya has additionally given this shorter version also.

Veda learners are requested to get necessary clarifications from their Guru(s) before they use this Compilation.

ओं नमः परमात्मने, श्री महागणपतये नमः

श्री गुरुभ्यो नमः, हरिः ओं

# 5 कृष्ण यजुर्वेदीय तैत्तिरीय आरण्यके – पञ्चमः प्रपाठकः

## 5.1 पञ्चमः प्रपाठकः – शीक्षा वल्ली

## अनुवाकं – 1

**T.A.5.1.1**

शन्नो मित्रः शं ँवरुणः । शन्नो भवत्वर्यमा । शन्न इन्द्रो बृहस्पतिः ।

शन्नो विष्णु–रुरुक्रमः । नमो ब्रह्मणे । नमस्ते वायो ।

त्वमेव प्रत्यक्षं ब्रह्मासि । त्वमेव प्रत्यक्षं ब्रह्म वदिष्यामि ।

ऋतं ँवदिष्यामि । सत्यं ँवदिष्यामि ( ) । तन्मामवतु । तद्वक्तारमवतु ।

अवतु मां । अवतु वक्तारं ॥ ओं शान्तिः शान्तिः शान्तिः ॥ **1 (15)**

*(सत्त्यम् ँवदिष्यामि पञ्च च) (A1)*

## अनुवाकं – 2

**T.A.5.2.1**

शीक्षां ँव्याख्यास्यामः । वर्णः स्वरः । मात्रा बलं । साम सन्तानः ।

इत्युक्तः शीक्षाद्ध्यायः ॥ **2 (5)** *(शीक्षाम् पञ्च) (A2)*

# अनुवाकं – 3

**T.A.5.3.1**

सह नौ यशः । सह नौ ब्रह्मवर्चसं ॥

अथातः स॒ꣳहिताया उपनिषदं ँव्याख्यास्यामः । पञ्चस्वधि–करणेषु ।

अधिलोकमधि–ज्यौतिष–मधिविद्य–मधिप्रज–मद्ध्यात्मं ।

ता महासꣳहिता इत्याचक्षते ॥

अथाधि लोकं । पृथिवी पूर्वरूपं । द्यौरुत्तररूपं ।

आकाशः सन्धिः । **3 (10)**

**T.A.5.3.2**

वायुः सन्धानं । इत्यधि लोकं ॥

अथाधि ज्यौतिषं । अग्निः पूर्व रूपं । आदित्य उत्तररूपं ।

आपः सन्धिः । वैद्युतः सन्धानं । इत्यधि ज्यौतिषं ॥

अथाधि विद्यं । आचार्यः पूर्व रूपं । **4 (10)**

**T.A.5.3.3**

अन्तेवास्युत्तररूपं । विद्या सन्धिः ।

प्रवचनꣳ सन्धानं । इत्यधि विद्यं ॥

अथाधिप्रजं । माता पूर्वरूपं । पितोत्तररूपं । प्रजा सन्धिः ।

प्रजननꣳ सन्धानं । इत्यधिप्रजं ॥ **5 (10)**

**T.A.5.3.4**

अथाद्ध्यात्मं । अधराहनुः पूर्व रूपं । उत्तराहनु–रुत्तररूपं ।

वाख् सन्धिः । जिह्वा सन्धानं । इत्यद्ध्यात्मं ॥

इती मामहा सꣳहिताः ॥

य एवमेता महासꣳहिता व्याख्याता वेद ।

सन्धीयते प्रजया पशुभिः ।

ब्रह्मवर्च–सेनान्नाद्येन सुवर्ग्येण (सुवर्गेण) लोकेन ( ) ॥ **6 (10)**

*(सन्धि – राचार्यः पूर्वरूप – मित्यधिप्रजम् – लँोकेन) (A3)*

## अनुवाकं – 4

**T.A.5.4.1**

य श्छन्दसा–मृषभो विश्वरूपः । छन्दोभ्यो–ऽद्ध्यमृताथ् संबभूव ।

स मेन्द्रो मेधया स्पृणोतु । अमृतस्य देव धारणो भूयासं ॥

शरीरं मे विचर्.षणं । जिह्वा मे मधुमत्तमा । कर्णाभ्यां भूरि विश्रुवं ।

ब्रह्मणः कोशोऽसि मेधया ऽपिहितः । श्रुतं मे गोपाय ॥

आवहन्ती वितन्वाना । **7 (10)**

**T.A.5.4.2**

कुर्वाणा चीर–मात्मनः । वासाꣳसि मम गावश्च ।

अन्नपाने च सर्वदा । ततो मे श्रिय–मावह ।

लोमशां पशुभिः सह स्वाहा ॥ आमायन्तु ब्रह्मचारिणः स्वाहा ।

विमाऽऽयन्तु ब्रह्मचारिणः स्वाहा । प्रमाऽऽयन्तु ब्रह्मचारिणः स्वाहा ।

दमायन्तु ब्रह्मचारिणः स्वाहा । शमायन्तु ब्रह्मचारिणः स्वाहा ॥ **8 (10)**

**T.A.5.4.3**

यशो जनेऽसानि स्वाहा । श्रेयान्. वस्यसोऽसानि स्वाहा ॥

तं त्वा भग प्रविशानि स्वाहा । स मा भग प्रविश स्वाहा ।

तस्मिनथ् सहस्र शाखे । निभगाहं त्वयि मृजे स्वाहा ॥

यथाऽऽपः प्रवताऽऽयन्ति । यथा मासा अहर्जरं ।

एवं मां ब्रह्मचारिणः । धातरायन्तु सर्वतः स्वाहा ( ) ॥

प्रतिवेशोऽसि प्र मा भाहि प्र मा पद्यस्व ॥ **9 (11)** ***(वितन्वाना – शमायन्तु ब्रह्मचारिणः स्वाहा–धातरायन्तु सर्वतः स्वाहैकम् च)*** *(A4)*

# अनुवाकं – 5

**T.A.5.5.1**

भू–र्भुव॒–स्सुव॒–रिति॒ वा ए॒ता स्ति॒स्रो व्याहृ॑तयः ॥

तासा॑मुहस्मै॒ तां च॑तु॒र्थीं । माहा॑चमस्य॒ः प्रवे॑दयते ।

मह॒ इति॑ ॥ तद् ब्रह्म॑ । स आ॒त्मा । अङ्गा᳚न्य॒न्या दे॒वताः᳚ ॥

भूरिति॒ वा अ॒यं ँलो॒कः । भुव॒ इत्य॒न्तरि॑क्षं ।

सुव॒–रित्य॒सौ लो॒कः । **10 (10)**

**T.A.5.5.2**

मह॒ इत्या॑दि॒त्यः । आ॒दि॒त्येन॒ वाव सर्वे॑ लो॒का मही॑यन्ते ॥

भूरिति॒ वा अ॒ग्निः । भुव॒ इति॑ वा॒युः । सुव॒रित्या॑दि॒त्यः ।

मह॒ इति॑ च॒न्द्रमाः᳚ । च॒न्द्रम॑सा॒ वाव सर्वा॑णि॒ ज्योती॑ꣳषि॒ मही॑यन्ते ॥

भू–रिति॒ वा ऋच॑ः । भुव॒ इति॒ सामा॑नि ।

सुव॒ रिति॒ यजू॑ꣳषि। **11 (10)**

**T.A.5.5.3**

मह॒ इति॒ ब्रह्म॑ । ब्रह्म॑णा॒ वाव सर्वे॑ वे॒दा मही॑यन्ते ॥

भूरिति॒ वै प्रा॒णः । भुव॒ इत्य॑पा॒नः । सुव॒रिति॑ व्या॒नः । मह॒ इत्यन्नं᳚ ।

अन्नेन वाव सर्वे प्राणा महीयन्ते ॥ ता वा एता–श्चतस्र श्चतुर्धा ।

चतस्र–श्चतस्रो व्याहृतयः । ता यो वेद ( ) । स वेद ब्रह्म ।

सर्वेऽस्मै देवा बलिमावहन्ति ॥ **12 (12)**

*(असौ लोको – यजूꣳषि – वेद द्वे च) (A5)*

## अनुवाकं – 6

**T.A.5.6.1**

स य एषोऽन्तर्.–हृदय आकाशः । तस्मिन्नयं पुरुषो मनोमयः ।

अमृतो हिरण्मयः ॥ अन्तरेण तालुके । य एष स्तन इवावलंबते ।

सेन्द्र योनिः । यत्रासौ केशान्तो विवर्तते । व्यपोह्य शीर्.षकपाले ॥

भूरित्यग्नौ प्रतितिष्ठति । भुव इति वायौ । **13 (10)**

**T.A.5.6.2**

सुवरित्यादित्ये । मह इति ब्रह्मणि । आप्नोति स्वाराज्यं ।

आप्नोति मनसस्पतिं । वाक्पति श्चक्षुष्पतिः । श्रोत्रपति र्विज्ञानपतिः ।

एतत् ततो भवति । आकाश शरीरं ब्रह्म ।

सत्यात्म प्राणारामं मन आनन्दं । शान्ति समृद्ध–ममृतं ( ) ॥

इति प्राचीन योग्योपास्व ॥ **14 (11)** *(वाया–वमृत मेकम् च) (A6)*

## अनुवाकं – 7

**T.A.5.7.1**

पृथिव्यन्तरिक्षं द्यौर्-दिशोऽवान्तरदिशाः ।

अग्निर्-वायु-रादित्य-श्चन्द्रमा नक्षत्राणि ।

आप ओषधयो वनस्पतय आकाश आत्मा । इत्यधिभूतं ॥

अथाद्ध्यात्मं । प्राणो व्यानोऽपान उदानः समानः ।

चक्षुः श्रोत्रं मनो वाक् त्वक् । चर्म मा॒ꣳ स॒ꣳस्नावास्थि मज्जा ॥

एत दधिविधायर्.षि रवोचत् । पाङ्क्तं ँवा इद॒ꣳ सर्वं ( ) ।

पाङ्क्तेनैव पाङ्क्त॒ꣳ स्पृणोतीति ॥ **15 (11)** *(सर्वमेकम् च) (A7)*

## अनुवाकं – 8

**T.A.5.8.1**

ओ-मिति ब्रह्म ॥ ओ-मितीद॒ꣳ सर्वं ॥

ओमित्येत-दनुकृति हस्म वा अप्यो श्रावयेत्या-श्रावयन्ति ।

ओ-मिति सामानि गायन्ति । ओ॒ꣳ शोमिति शस्त्राणि श॒ꣳसन्ति ।

ओ-मित्यद्ध्वर्युः प्रतिगरं प्रतिगृणाति । ओ-मिति ब्रह्मा प्रसौति ।

ओ–मित्यग्निहो॒त्र–मनुजानाति ।

ओ–मिति ब्रा॒ह्मणः प्र॒वक्ष्यन्ना॒ह ब्रह्मोपाप्नवा॒नीति ।

ब्र॒ह्मैवो–पाप्नोति ॥ **16 (10)** *(ओम् दश) (A8)*

## अनुवाकं – 9

**T.A.5.9.1**

ऋतं च स्वाद्ध्याय प्रवच॒ने च । सत्यं च स्वाद्ध्याय प्रवच॒ने च ।

तपश्च स्वाद्ध्याय प्रवच॒ने च । दमश्च स्वाद्ध्याय प्रवच॒ने च ।

शमश्च स्वाद्ध्याय प्रवच॒ने च । अग्नयश्च स्वाद्ध्याय प्रवच॒ने च ।

अग्निहोत्रं च स्वाद्ध्याय प्रवच॒ने च ।

अतिथयश्च स्वाद्ध्याय प्रवच॒ने च ।

मानुषं च स्वाद्ध्याय प्रवच॒ने च ।

प्रजा च स्वाद्ध्याय प्रवच॒ने च ( ) ।

प्रजनश्च स्वाद्ध्याय प्रवच॒ने च । प्रजातिश्च स्वाद्ध्याय प्रवच॒ने च ॥

सत्यमिति सत्यवचा राथी॒ तरः ।

तप इति तपोनित्यः पौरुशि॒ष्टिः ।

स्वाद्ध्याय प्रवचने एवेति नाको मौद्गल्यः ।

तद्धि तपस्तद्धि तपः ॥ **17 (16)**

*(प्रजा च स्वाद्ध्यायप्रवचने च षट्च) (A9)*

## <u>अनुवाकं – 10</u>

**<u>T.A.5.10.1</u>**

अहं ँवृक्षस्य रेरिवा । कीर्तिः पृष्ठं गिरेरिव ।

ऊद्ध्र्व पवित्रो वाजिनीव स्वमृतमस्मि । द्रविण॒ँ सवर्चसं ।

सुमेधा अमृतोक्षितः । इति त्रिशङ्कोर्–वेदानुवचनं ॥ **18 (6)**

*(अह॒ँ षट्) (A10)*

## <u>अनुवाकं – 11</u>

**<u>T.A.5.11.1</u>**

वेदमनूच्या– ऽचार्योन्तेवासिन–मनुशास्ति ॥

सत्यं ँवद । धर्मं चर ॥ स्वाद्ध्यायान्मा प्रमदः ।

आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेथ्सीः ।

सत्यान्न प्रमदितव्यं । धर्मान्न प्रमदितव्यं । कुशलान्न प्रमदितव्यं ।

भूत्यै न प्रमदितव्यं । स्वाद्ध्याय प्रवचनाभ्यां न प्रमदितव्यं । **19 (10)**

**T.A.5.11.2**

देवपितृकार्याभ्यां न प्रमदितव्यं ॥

मातृदेवो भव । पितृदेवो भव ।

आचार्य देवो भव । अतिथिदेवो भव ॥

यान्यनवद्यानि कर्माणि । तानि सेवितव्यानि । नो इतराणि ॥

यान्यस्माकꣳ सुचरितानि । तानि त्वयोपास्यानि । **20 (10)**

**T.A.5.11.3**

नो इतराणि ॥ ये के चास्म–च्छ्रेयाꣳसो ब्राह्मणाः ।

तेषां त्वयाऽऽसने न प्रश्वसितव्यं ॥ श्रद्धया देयं । अश्रद्धयाऽदेयं ।

श्रिया देयं । ह्रिया देयं । भिया देयं । सम्ँविदा देयं ॥

अथ यदि ते कर्मविचिकित्सा वा वृत्त विचिकित्सा

वा स्यात् । **21 (10)**

**T.A.5.11.4**

ये तत्र ब्राह्मणाः सम्मर्.शिनः । युक्ता आयुक्ताः ।

अलूक्षा धर्मकामाः स्युः । यथा ते तत्र वर्तेरन्न् । तथा तत्र वर्तेथाः ॥

अथाभ्याख्यातेषु । ये तत्र ब्राह्मणाः सम्मर्.शिनः । युक्ता आयुक्ताः ।
अलूक्षा धर्म कामाः स्युः । यथा ते तेषु वर्तेरन्न् ( ) । **22 (10)**

**T.A.5.11.5**

तथा तेषु वर्तेथाः ॥ एष आदेशः । एष उपदेशः । एषा वेदोपनिषत् ।
एतदनुशासनं । एव मुपासितव्यं । एव मुचैतदुपास्यं ॥ **23 (7)**

*(स्वाद्ध्यायप्रवचनाभ्याम् न प्रमदितव्यम् – तानित्वयोपास्यानि – स्यात् – तेषु वर्तेरन्थ् – +सप्त च) (A11)*

## अनुवाकं – 12

**T.A.5.12.1**

शन्नो मित्रः शं वरुणः । शन्नो भवत्वर्यमा । शन्न इन्द्रो बृहस्पतिः ।
शन्नो विष्णु रुरुक्रमः । नमो ब्रह्मणे । नमस्ते वायो ।
त्वमेव प्रत्यक्षं ब्रह्मासि । त्वामेव प्रत्यक्षं ब्रह्मा वादिषं । ऋतमवादिषं ।
सत्यमवादिषं ( ) । तन्मामावीत् । तद्वक्तारमावीत् । आवीन्मां ।
आवीद्वक्तारं ॥ ओं शान्तिः शान्तिः शान्तिः ॥ **24 (15)**

*(सत्यमवादिषम् पञ्च च) (A12)*

॥ **इति शीक्षावल्ली समाप्ता** ॥

**ओं नमः परमात्मने, श्री महागणपतये नमः**

**श्री गुरुभ्यो नमः, हरिः ओं**

## ब्रह्मानन्द वल्ली

# अनुवाकं – 13

**T.A.5.13.1**

सह ना ववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै ।

तेजस्विना वधीतमस्तु मा विद्विषावहै ॥

ओं शान्तिः शान्तिः शान्तिः ॥ **25 (5)** *(सह पञ्च) (A13)*

# अनुवाकं – 14

**T.A.5.14.1**

ब्रह्मविदाप्नोति परं ॥

तदेषाऽभ्युक्ता । सत्यं ज्ञान–मनन्तं ब्रह्म ।

यो वेद निहितं गुहायां परमे व्योमन्न् ।

सोऽश्नुते सर्वान् कामान्थ् सह । ब्रह्मणा विपश्चितेति ॥

तस्माद्वा एतस्मादात्मन आकाशः संभूतः । आकाशाद् वायुः ।

वायोरग्निः । अग्नेरापः । अद्भ्यः पृथिवी । पृथिव्या ओषधयः ।

ओषधीभ्योऽन्नं । अन्नात् पुरुषः ॥

स वा एष पुरुषोऽन्नरसमयः ॥ तस्येदमेव शिरः ।

अयं दक्षिणः पक्षः । अयमुत्तरः पक्षः । अयमात्मा ।

इदं पुच्छं प्रतिष्ठा ॥ तदप्येष श्लोको भवति ॥ **26 (21)**

**<u>T.A.5.14.2</u>**

अन्नाद्वै प्रजाः प्रजायन्ते । याः काश्च पृथिवी᳚ श्रिताः ।

अथो अन्नेनैव जीवन्ति । अथैनदपियन्त्यन्ततः ।

अन्न᳚ं हि भूतानां ज्येष्ठं । तस्माथ् सर्वौषध मुच्यते ।

सर्वं᳚ वै तेऽन्नमाप्नुवन्ति । येऽन्नं ब्रह्मोपासते ।

अन्न᳚ं हि भूतानां ज्येष्ठं । तस्माथ् सर्वौषध मुच्यते ।

अन्नाद् भूतानि जायन्ते । जातान्यन्नेन वर्द्धन्ते ।

अद्यतेऽत्ति च भूतानि । तस्मादन्नं तदुच्यत इति ॥

तस्माद्वा एतस्मा–दन्नरसमयात् ।

अन्योऽन्तर आत्मा प्राण मयः । तेनैष पूर्णः ॥

स वा एष पुरुषविध एव । तस्य पुरुष विधतां ।

अन्वयं पुरुष विधः । तस्य प्राण एव शिरः ॥
व्यानो दक्षिणः पक्षः । अपान उत्तरः पक्षः । आकाश आत्मा ।
पृथिवी पुच्छं प्रतिष्ठा ॥ तदप्येष श्लोको भवति ॥ **27 (26)**

**T.A.5.14.3**

प्राणं देवा अनुप्राणन्ति । मनुष्याः पशवश्च ये ।
प्राणो हि भूतानामायुः । तस्माथ् सर्वायुष मुच्यते ।
सर्वमेव त आयुर्यन्ति । ये प्राणं ब्रह्मोपासते ।
प्राणो हि भूतानामायुः । तस्माथ् सर्वायुष–मुच्यत इति ॥
तस्यैष एव शारीर आत्मा । यः पूर्वस्य ॥
तस्माद्वा एतस्मात् प्राणमयात् । अन्योऽन्तर आत्मा मनोमयः ।
तेनैष पूर्णः ॥ स वा एष पुरुषविध एव । तस्य पुरुषविधतां ।
अन्वयं पुरुषविधः । तस्य यजुरेव शिरः । ऋग् दक्षिणः पक्षः ।
सामोत्तरः पक्षः । आदेश आत्मा । अथर्वाङ्गिरसः पुच्छं प्रतिष्ठा ॥
तदप्येष श्लोको भवति ॥ **28 (22)**

**T.A.5.14.4**

यतो वाचो निवर्तन्ते । अप्राप्य मनसा सह । आनन्दं ब्रह्मणो विद्वान् ।
न बिभेति कदाचनेति ॥ तस्यैष एव शारीर आत्मा । यः पूर्वस्य ॥
तस्माद्वा एतस्मान् मनोमयात् । अन्योऽन्तर आत्मा विज्ञानमयः ।
तेनैष पूर्णः ॥ स वा एष पुरुषविध एव । तस्य पुरुष विधतां ।
अन्वयं पुरुष विधः । तस्य श्रद्धैव शिरः । ऋतं दक्षिणः पक्षः ।
सत्यमुत्तरः पक्षः । योग आत्मा ।
महः पुच्छं प्रतिष्ठा ॥ तदप्येष श्लोको भवति ॥ **29 (18)**

**T.A.5.14.5**

विज्ञानं यँज्ञं तनुते । कर्माणि तनुतेऽपि च । विज्ञानं देवाः सर्वे ।
ब्रह्म ज्येष्ठ–मुपासते । विज्ञानं ब्रह्म चेद् वेद । तस्माच्चेन्न प्रमाद्यति ।
शरीरे पाप्मनो हित्वा । सर्वान्–कामान्थ्–समश्नुत इति ॥
तस्यैष एव शारीर आत्मा । यः पूर्वस्य ॥
तस्माद्वा एतस्माद्–विज्ञानमयात् । अन्योऽन्तर आत्माऽऽनन्दमयः ।
तेनैष पूर्णः ॥ स वा एष पुरुषविध एव । तस्य पुरुषविधतां ।
अन्वयं पुरुषविधः । तस्य प्रिय–मेव शिरः । मोदो दक्षिणः पक्षः ।

प्रमोद उत्तरः पक्षः । आनन्द आत्मा । ब्रह्म पुच्छं प्रतिष्ठा ॥

तदप्येष श्लोको भवति ॥ **30 (22)**

**T.A.5.14.6**

असन्नेव स भवति । असद् ब्रह्मेति वेद चेत् ।

अस्ति ब्रह्मेति चेद् वेद । सन्तमेनं ततो विदुरिति ॥

तस्यैष एव शारीर आत्मा । यः पूर्वस्य ॥ अथातोऽनु प्रश्नाः ॥

उता विद्वा नमुं ँलोकं प्रेत्य । कश्चन गच्छती(3) ।

आहो विद्वानमुं ँलोकं प्रेत्य ।

कश्चित् समश्नुता(3) उ ॥ सोऽकामयत ।

बहुस्यां प्रजायेयेति । स तपोऽतप्यत । स तपस्तप्त्वा ।

इद॒ꣳ सर्व–मसृजत ॥ यदिदं किञ्च । तथ्सृष्ट्वा । तदेवानु प्राविशत् ॥

तदनुप्रविश्य । सच्च त्यच्चाभवत् । निरुक्तं चा निरुक्तं च ।

निलयनं चा निलयनं च । विज्ञानं चा विज्ञानं च ।

सत्यं चानृतं च सत्य–मभवत् ॥ यदिदं किञ्च ।

तथ्सत्य–मित्या चक्षते ॥ तदप्येष श्लोको भवति ॥ **31 (28)**

**T.A.5.14.7**

असद्वा इदमग्र आसीत् । ततो वै सदजायत ।

तदात्मान॰ स्वय–मकुरुत । तस्मात् तथ् सुकृतमुच्यत इति ॥

यद्वै तथ् सुकृतं । रसो वै सः ।

रस॰ ह्येवायं ँलब्ध्वाऽऽनन्दी भवति ॥

को ह्येवान्यात् कः प्राण्यात् । यदेष आकाश आनन्दो न स्यात् ।

एष ह्येवानन्दयाति ॥

यदा ह्येवैष एतस्मिन्–नदृश्ये ऽनात्म्ये ऽनिरुक्ते ऽनिलयने ऽभयं

प्रतिष्ठां ँविन्दते ।

अथ सोऽभयं गतो भवति ॥

यदा ह्येवैष एतस्मिन्–नुदर–मन्तरं कुरुते । अथ तस्य भयं भवति ॥

तत्त्वेव भयं ँविदुषो–ऽमन्वानस्य ॥ तदप्येष श्लोको भवति ॥ **32 (16)**

**T.A.5.14.8**

भीषाऽस्मा–द्वातः पवते । भीषोदेति सूर्यः ।

भीषाऽस्मा–दग्नि–श्चेन्द्रश्च । मृत्युर् धावति पञ्चम इति ॥

सैषाऽऽनन्दस्य मीमा॰सा भवति ॥ युवा स्याथ् साधु युवाऽद्ध्यायकः ।

आशिष्ठो दृढिष्ठो बलिष्ठः । तस्येयं पृथिवी सर्वा वित्तस्य पूर्णा स्यात् ।

स एको मानुष आनन्दः ॥ ते ये शतं मानुषा आनन्दाः । **33.a (10)**

स एको मनुष्य-गन्धर्वाणा-मानन्दः । श्रोत्रियस्य चाकामहतस्य ॥

ते ये शतं मनुष्य-गन्धर्वाणा-मानन्दाः ।

स एको देव-गन्धर्वाणा-मानन्दः । श्रोत्रियस्य चाकामहतस्य ॥

ते ये शतं देव-गन्धर्वाणा-मानन्दाः ।

स एकः पितृणां चिरलोक-लोकाना-मानन्दः ।

श्रोत्रियस्य चाकामहतस्य ॥

ते ये शतं पितृणां चिरलोक-लोकाना-मानन्दाः ।

स एक आजानजानां देवाना-मानन्दः । **33.b (10)**

श्रोत्रियस्य चाकामहतस्य ॥

ते ये शत-माजान-जानां देवाना मानन्दाः ।

स एकः कर्म-देवानां देवाना-मानन्दः ।

ये कर्मणा देवानपि यन्ति । श्रोत्रियस्य चाकामहतस्य ॥

ते ये शतं कर्मदेवानां देवाना॑–मान॒न्दाः । स एको देवाना॑–मान॒न्दः ।
श्रोत्रियस्य चाका॑मह॒तस्य ॥ ते ये शतं देवाना॑–मान॒न्दाः ।
स एक इन्द्र॑स्यान॒न्दः । **33.c (10)**

श्रोत्रियस्य चाका॑मह॒तस्य ॥ ते ये शतमिन्द्र॑–स्याऽऽन॒न्दाः ।
स एको बृहस्पते॑–रान॒न्दः । श्रोत्रियस्य चाका॑मह॒तस्य ॥
ते ये शतं बृहस्पते॑ रान॒न्दाः । स एकः प्रजापते॑–रान॒न्दः ।
श्रोत्रियस्य चाका॑मह॒तस्य ॥ ते ये शतं प्रजापते॑–रान॒न्दाः ।
स एको ब्रह्मण॑ आन॒न्दः । श्रोत्रियस्य चाका॑मह॒तस्य ॥ **33.d (10)**

स यश्चा॑यं पु॒रुषे । यश्चासा॑–वादि॒त्ये । स एक॑ः ॥ स य॑ ए॒वं ँवित् ।
अस्माल्लो॑कात् प्रे॒त्य । एतमन्नमय–मात्मान–मुप॑सङ्क्रा॒मति ।
एतं प्राणमय–मात्मान–मुप॑सङ्क्रा॒मति ।
एतं मनोमय–मात्मान–मुप॑सङ्क्रा॒मति ।
एतं ँविज्ञानमय–मात्मान–मुप॑सङ्क्रा॒मति ।

एतमानन्दमय-मात्मान-मुपसङ्क्रामति ॥

तदप्येष श्लोको भवति ॥ **33.e (11)**

**T.A.5.14.9**

यतो वाचो निवर्तन्ते । अप्राप्य मनसा सह । आनन्दं ब्रह्मणो विद्वान् ।

न बिभेति कुतश्चनेति ॥ एतꣳ ह वाव न तपति ।

किमहꣳ साधु नाकरवं । किमहं पाप-मकरव-मिति ॥

स य एवं ँविद्वानेते आत्मानꣲ स्पृणुते ॥

उभे ह्येवैष एते आत्मानꣲ स्पृणुते ।

य एवं ँवेद ॥ इत्युपनिषत् ॥ **34 (11)**

सह ना ववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै ।

तेजस्विना वधीतमस्तु मा विद्विषावहै ॥ ओं शान्तिः शान्तिः शान्तिः ॥

*(ब्रह्मविदिदमयमिदमेकविꣳशतिः । अन्ना दन्नरसमयात् प्राणो*

*व्यानोऽपान आकाशः पृथिवी पुच्छꣳ षड्विꣳशतिः ।*

*प्राणम् प्राणमयान् मनो यजुर्. ऋख् सामादेशोऽथर्वाङ्गिरसः पुच्छम्*

*द्वाविꣳशतिः । यतः श्रद्धर्तꣳ सत्यम् ँयोगो महोऽष्टादश ।*

विज्ञानम् प्रियम् मोदः प्रमोद आनन्दो ब्रह्म पुच्छम् द्वावि(ग्)ंशतिः । असन्नेवाथाष्टावि (ग्)ंशतिः । असथ् षोडश । भीषाऽस्मान् मानुषो मनुष्यगन्धर्वाणाम् देवगन्धर्वाणाम् पितृणाम्चिरलोकलोकाना माजानजानाम् कर्मदेवानाम् ँये कर्मणा देवानामिन्द्रस्य बृहस्पतेः प्रजापतेर् ब्रह्मणः स यश्च संक्रामत्येकपञ्चाशत् ।

यतः कुतश्च नैतमेकादश नव) (A14)

इति ब्रह्मानन्दवल्ली समाप्ता

====================

**ओं नमः परमात्मने, श्री महागणपतये नमः**

**श्री गुरुभ्यो नमः, हरिः ओं**

## भृगु वल्ली

सह ना ववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै ।
तेजस्विना वधीतमस्तु मा विद्विषावहै ॥
ओं शान्तिः शान्तिः शान्तिः ॥

## अनुवाकं – 15

**T.A.5.15.1**

भृगुर्वै वारुणिः । वरुणं पितर–मुपससार । अधीहि भगवो ब्रह्मेति ॥
तस्मा एतत् प्रोवाच । अन्नं प्राणं चक्षुः श्रोत्रं मनो वाचमिति ॥
तꣳ होवाच । यतो वा इमानि भूतानि जायन्ते ।
येन जातानि जीवन्ति । यत् प्रयन्त्यभि सम्ँविशन्ति ।
तद् विजिज्ञासस्व । तद् ब्रह्मेति ॥
स तपोऽतप्यत । स तप–स्तप्त्वा ॥ **35 (13)**

**T.A.5.15.2**

अन्नं ब्रह्मेति व्यजानात् । अन्नाद्ध्येव खल्विमानि भूतानि जायन्ते ।

अन्नेन जातानि जीवन्ति । अन्नं प्रयन्त्यभि-सम्ँविशन्तीति ॥

तद् विज्ञाय । पुनरेव वरुणं पितर-मुपससार ।

अधीहि भगवो ब्रह्मेति । त७ँ होवाच । तपसा ब्रह्म विजिज्ञासस्व ।

तपो ब्रह्मेति । स तपोऽतप्यत । स तप-स्तप्त्वा ॥ **36 (12)**

**T.A.5.15.3**

प्राणो ब्रह्मेति व्यजानात् ।

प्राणाद्ध्येव खल्विमानि भूतानि जायन्ते । प्राणेन जातानि जीवन्ति ।

प्राणं प्रयन्त्यभि-सम्ँविशन्तीति ॥ तद् विज्ञाय ।

पुनरेव वरुणं पितर-मुपससार । अधीहि भगवो ब्रह्मेति ।

त७ँ होवाच । तपसा ब्रह्म विजिज्ञासस्व । तपो ब्रह्मेति ।

स तपोऽतप्यत । स तप-स्तप्त्वा ॥ **37 (12)**

**T.A.5.15.4**

मनो ब्रह्मेति व्यजानात् । मनसो ह्येव खल्विमानि भूतानि जायन्ते ।

मनसा जातानि जीवन्ति । मनः प्रयन्त्यभि-सम्ँविशन्तीति ॥

तद् विज्ञाय । पुनरेव वरुणं पितर-मुपससार ।
अधीहि भगवो ब्रह्मेति । त७ँ होवाच । तपसा ब्रह्म विजिज्ञासस्व ।
तपो ब्रह्मेति । स तपोऽतप्यत । स तप-स्तप्त्वा ॥ **38 (12)**

**T.A.5.15.5**

विज्ञानं ब्रह्मेति व्यजानात् ।
विज्ञाना-द्ध्येव खल्विमानि भूतानि जायन्ते ।
विज्ञानेन जातानि जीवन्ति । विज्ञानं प्रयन्त्यभि-सम्ँविशन्तीति ॥
तद् विज्ञाय । पुनरेव वरुणं पितर-मुपससार ।
अधीहि भगवो ब्रह्मेति । त७ँ होवाच । तपसा ब्रह्म विजिज्ञासस्व ।
तपो ब्रह्मेति । स तपोऽतप्यत । स तप-स्तप्त्वा ॥ **39 (12)**

**T.A.5.15.6**

आनन्दो ब्रह्मेति व्यजानात् ।
आनन्दा-द्ध्येव-खल्विमानि भूतानि जायन्ते ।
आनन्देन जातानि जीवन्ति । आनन्दं प्रयन्त्यभि-सम्ँविशन्तीति ॥
सैषा भार्गवी वारुणी विद्या । परमे व्योमन् प्रतिष्ठिता ॥
य एवं ँवेद प्रतितिष्ठति । अन्नवानन्नादो भवति ।

महान् भवति प्रजया पशुभिर् ब्रह्मवर्चसेन ।

महान् कीर्त्या॥ **40 (10)**

**T.A.5.15.7**

अन्नं न निन्द्यात् । तद् व्रतं ॥ प्राणो वा अन्नं । शरीरमन्नादं ।

प्राणे शरीरं प्रतिष्ठितं । शरीरे प्राणः प्रतिष्ठितः ।

तदेत–दन्न–मन्ने प्रतिष्ठितं ॥

स य एत–दन्न–मन्ने प्रतिष्ठितं ँवेद प्रतितिष्ठति ।

अन्नवा–नन्नादो भवति ।

महान् भवति प्रजया पशुभिर्–ब्रह्मवर्चसेन ।

महान् कीर्त्या ॥ **41 (11)**

**T.A.5.15.8**

अन्नं न परिचक्षीत । तद् व्रतं । आपो वा अन्नं । ज्योतिरन्नादं ।

अप्सु ज्योतिः प्रतिष्ठितं । ज्योतिष्यापः प्रतिष्ठिताः ।

तदेत–दन्न–मन्ने प्रतिष्ठितं ॥

स य एत–दन्न–मन्ने प्रतिष्ठितं ँवेद प्रतितिष्ठति ।

अन्नवा–नन्नादो भवति । महान् भवति प्रजया पशुभिर् ब्रह्मवर्चसेन ।

महान् कीर्त्या ॥ **42 (11)**

**T.A.5.15.9**

अन्नं बहु कुर्वीत । तद् व्रतं ॥ पृथिवी वा अन्नं । आकाशोऽन्नादः ।

पृथिव्या–माकाशः प्रतिष्ठितः । आकाशे पृथिवी प्रतिष्ठिता ।

तदेत–दन्न–मन्ने प्रतिष्ठितं ॥

स य एत–दन्न–मन्ने प्रतिष्ठितं ँवेद प्रतितिष्ठति ।

अन्नवानन्नादो भवति । महान् भवति प्रजया पशुभिर् ब्रह्मवर्चसेन ।

महान् कीर्त्या ॥ **43 (11)**

**T.A.5.15.10**

न कञ्चन वसतौ प्रत्याचक्षीत । तद् व्रतं ॥

तस्माद्यया कया च विधया बह्वन्नं प्राप्नुयात् ॥

अराद्ध्यस्मा अन्नमित्याचक्षते ॥ एतद्वै मुखतोऽन्न(ग्म्) राद्धं ।

मुखतोऽस्मा अन्न(ग्म्) राद्ध्यते । एतद्वै मद्ध्यतोऽन्न(ग्म्) राद्धं ।

मद्ध्यतोऽस्मा अन्न(ग्म्) राद्ध्यते । एदद्वा अन्ततोऽन्न(ग्म्) राद्धं ।

अन्ततोऽस्मा अन्न(ग्म्) राद्ध्यते । **44.a (10)**

य एवं वेँद ॥ क्षेम इति वाचि । योगक्षेम इति प्राणापानयोः ।
कर्मेति हस्तयोः । गति–रिति पादयोः । विमुक्ति–रिति पायौ ।
इति मानुषीः समाज्ञाः ॥ अथ दैवीः । तृप्ति–रिति वृष्टौ ।
बल–मिति विद्युति । **44.b (10)**

यश इति पशुषु । ज्योतिरिति नक्षत्रेषु ।
प्रजाति–रमृत–मानन्द इत्युपस्थे । सर्व मित्याकाशे ॥
तत् प्रतिष्ठे–त्युपासीत । प्रतिष्ठावान् भवति । तन्मह इत्युपासीत ।
महान् भवति । तन्मन इत्युपासीत । मानवान् भवति । **44.c (10)**

तन्नम इत्युपासीत । नम्यन्तेऽस्मै कामाः । तद्ब्रह्मे–त्युपासीत ।
ब्रह्मवान् भवति । तद् ब्रह्मणः परिमर इत्युपासीत ।
पर्येणं म्रियन्ते द्विषन्तः सपत्नाः । परि येऽप्रिया भ्रातृव्याः ॥
स यश्चायं पुरुषे । यश्चासा–वादित्ये । स एकः । **44.d (10)**

स य एवं ँवित् । अस्माल्-लोकात् प्रेत्य ।

एतमन्नमय-मात्मान-मुपसङ्क्रम्य ।

एतं प्राणमय-मात्मान-मुपसङ्क्रम्य ।

एतं मनोमय-मात्मान-मुपसङ्क्रम्य ।

एतं ँविज्ञानमय-मात्मान-मुपसङ्क्रम्य ।

एत मानन्दमय मात्मान मुपसङ्क्रम्य ।

इमान् ँलोकान् कामान्नी काम-रूप्यनुसञ्चरन् ।

एतथ् साम गायन्नास्ते ॥ हा(3) वु हा(3) वु हा(3) वु । **44.e (10)**

अह-मन्न-मह-मन्न-महमन्नं ।

अहमन्नादो(2)ऽहमन्नादो(2) ऽहमन्नादः ।

अह॒ँ श्लोककृ-दह॒ँ श्लोककृ-दह॒ँ श्लोककृत् ।

अहमस्मि प्रथमजा ऋता(3) स्य ।

पूर्वं देवेभ्यो अमृतस्य ना(3) भा इ ।

यो मा ददाति स इदेव मा(3)वाः ।

अह–मन्न–मन्न–मदन्त–मा(3) द्मि ।
अहं ँविश्वं भुवन–मभ्यभवां । सुवर्न ज्योतीः ॥
य एवं ँवेद ॥ इत्युपनिषत् ॥ 44.f (11)

सह ना ववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै ।
तेजस्विना वधीतमस्तु मा विद्विषावहै ॥
ओं शान्तिः शान्तिः शान्तिः ॥

*(भृगुस्त्रयोदशा – न्नम् – प्राणो – मनो – विज्ञानम् द्वादश द्वादशा – नन्दो दशा – न्नम् न निन्द्या – दन्नम् न परिचक्षीता – न्नम् बहुकुर्वि तैकादशैकादश – न कंच नैकषष्टिर्दश ) (A15)*

**इति भृगुवल्ली समाप्ता**

**Prapaataka Korvai with starting Padams of 1 to 15 Anuvaakams :-**

*(शम् नः – शीक्षां – सह नौ – य श्छन्दसाम् – भूः –*
*स यः – पृथि – व्योमि – त्यृतम् चा – हम् – वेँदमनुच्य –*
*शम् नः – सह नाववतु – ब्रह्मविद् – भृगुः पञ्चदश)*

**Korvai with starting Padams of 1, 11, 21 Series of Dasinis :-**

(शम् नो – मह इत्यादित्यो – नो इतराण्य – सन्नेवा –
*न्नम् न निन्द्याच्चतुश्चत्वारिंशत् )*

**First and Last Padam in TA, 5th Prapaatakam :-**

*(शन्न – इत्युपनिषत् )*

॥ हरिः ओम् ॥

॥ कृष्ण यजुर्वेदीय तैत्तिरीय ब्राह्मणे आरण्यके पञ्चमः प्रपाठकः समाप्तः ॥

## Details of Dasini&Vaakyams for Prapaatakam5 (TA 5)

| | Dasini | Vaakyams |
|---|---|---|
| Anuvakam 1 | 1 | 15 |
| Anuvakam 2 | 1 | 5 |
| Anuvakam 3 | 4 | 40 |
| Anuvakam 4 | 3 | 31 |
| Anuvakam5 | 3 | 32 |
| Anuvakam6 | 2 | 21 |
| Anuvakam7 | 1 | 11 |
| Anuvakam8 | 1 | 10 |
| Anuvakam9 | 1 | 16 |
| Anuvakam 10 | 1 | 6 |
| Anuvakam 11 | 5 | 47 |
| Anuvakam 12 | 1 | 15 |
| Anuvakam 13 | 1 | 5 |
| Anuvakam 14 | 9 | 215 |
| Anuvakam 15 | 10 | 165 |
| Total → | 44 | 634 |

| | | |
|---|---|---|
| Total as per grantha books<br>anuvaakam 15 | 44 | |

**ओं नमः परमात्मने, श्री महागणपतये नमः**

**श्री गुरुभ्यो नमः, हरिः ओं**

## 6 कृष्ण यजुर्वेदीय तैत्तिरीय आरण्यके षष्ठः प्रपाठकः

### 6.1 षष्ठः प्रपाठकः – महानारायणोपनिषत्

सह ना ववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै ।

तेजस्विना वधीतमस्तु मा विद्विषावहै ॥

ओं शान्तिः शान्तिः शान्तिः ॥

## अनुवाकं – 1

**T.A.6.1.1**

अंभस्य पारे भुवनस्य मद्ध्ये नाकस्य पृष्ठे महतो महीयान् ।

शुक्रेण ज्योती(ग्ं)षि समनुप्रविष्टः प्रजापतिश्चरति गर्भे अन्तः ॥

यस्मिन्निद(ग्ं) सञ्च विचैति सर्वं यँस्मिन् देवा अधि विश्वे निषेदुः ।

तदेव भूतं तदु भव्यमा इदं तदक्षरे परमे व्योमन्न् ॥

येना वृतं खञ्च दिवं महीञ्च येनादित्य–स्तपति तेजसा

भ्राजसा च ।

यमन्तः समुद्रे कवयो वयन्ति यदक्षरे परमे प्रजाः ॥

यतः प्रसूता जगतः प्रसूती तोयेन जीवान् व्यचसर्ज (व्यससर्ज)
भूम्यां ।
यदोषधीभिः पुरुषान् पशूꣳश्च विवेश भूतानि चराचराणि ॥
अतः परं नान्य-दणीयसꣳहि परात् परं यन् महतो महान्तं ।
यदेक-मव्यक्त-मनन्तरूपं विश्वं पुराणं तमसः परस्तात् ॥ **1 (10)**

**T.A.6.1.2**

तदेवर्त्तं तदु सत्यमाहु-स्तदेव ब्रह्म परमं कवीनां ।
इष्टापूर्त्तं बहुधा जातं जायमानं विश्वं बिभर्त्ति भुवनस्य नाभिः ॥
तदेवाग्नि-स्तद्वायु-स्तथ्सूर्यस्तदु चन्द्रमाः ।
तदेव शुक्रममृतं तद्ब्रह्म तदापः स प्रजापतिः ॥
सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि ।
कला मुहूर्त्ताः काष्ठाश्चाहो-रात्राश्च सर्वशः ॥
अर्द्धमासा मासा ऋतवः सम्वथ्सरश्च कल्पन्तां ।
स आपः प्रदुघे उभे इमे अन्तरिक्ष-मथो सुवः ॥
नैन-मूर्द्ध्वं न तिर्यं च न मद्ध्ये परिजग्रभत् ।
न तस्येशे कश्चन तस्य नाम महद्यशः ॥ **2 (10)**

**T.A.6.1.3**

न सं॒दृशे॑ तिष्ठति॒ रूप॑मस्य॒ न चक्षु॑षा पश्यति॒ कश्च॒नैनं॓ ।
हृ॒दा म॑नी॒षा मन॑सा॒ऽभि क्लृप्तो॒ य ए॑नं ँ॒विदु॒-रमृ॒तास्ते॑ भवन्ति ॥

***Expansion of अ॒द्भ्यः सं॑भू॒त ः (Appearing in T.A.3.13.1)***

*अ॒द्भ्यः सं॑भूतः पृथि॒व्यै रसा॓च्च । वि॒श्वक॑र्मणः॒ सम॑वर्त॒ताधि॑ ।*
*तस्य॒ त्वष्टा॑ वि॒दध॑द्रू॒पमे॑ति ॥*
*तत्पुरु॑षस्य॒ विश्व॒माजा॑न॒मग्रे॓ । वेदा॒हमे॒तं पुरु॑षं म॒हान्तं॓ ।*
*आ॒दि॒त्य व॑र्णं॒ तम॑सः॒ पर॑स्तात् ।*
*त॒मे॒वं ँ॒वि॒द्वान॒मृत॑ इ॒ह भ॑वति । नान्यः पन्था॑ वि॒द्यतेऽय॑नाय ॥*
*प्र॒जाप॑तिश्चरति॒ गर्भे॑ अ॒न्तः । अ॒जाय॑मानो बहु॒धा विजा॑यते ।*
*तस्य॒ धीराः॒ परि॑जानन्ति॒ योनिं॓ । मरी॑चीनां प॒दमि॑च्छन्ति वे॒धसः॑ ॥*
*यो दे॒वेभ्य॒ आत॑पति । यो दे॒वानां॓ पु॒रोहि॑तः ।*
*पूर्वो॒ यो दे॒वेभ्यो॑ जा॒तः । नमो॑ रु॒चाय॒ ब्राह्म॑ये ॥*
*रुचं॑ ब्रा॒ह्मं ज॒नय॑न्तः । दे॒वा अग्रे॒ तद॑ब्रुवन् ।*
*यस्त्वै॒वं ब्रा॓ह्म॒णो वि॒द्यात् । तस्य॑ दे॒वा अस॒न् वशे॓ ॥*
*ह्रीश्च॑ते ल॒क्ष्मीश्च॒ पत्न्यौ॓ । अ॒हो॒रा॒त्रे पा॒र्श्वे । नक्ष॑त्राणि रू॒पं ।*

अश्विनौ व्यात्तं। इष्टं मनिषाण। अमुं मनिषाण। सर्वं मनिषाण॥

**Expansion of हिरण्यगर्भ : (Appearing in T.S.4.1.8.3)**

हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत्।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम॥

यः प्राणतो निमिषतो महित्वैक इद्राजा जगतो बभूव।
य ईशे अस्य द्विपद–श्चतुष्पदः कस्मै देवाय हविषा विधेम॥

य आत्मदा बलदा यस्य विश्व उपासते प्रशिषं ँयस्य देवाः।
यस्य छायामृतं ँयस्य मृत्युः कस्मै देवाय हविषा विधेम॥

यस्येमे हिमवन्तो महित्वा यस्य समुद्रꣳ रसया सहाऽऽहुः।
यस्येमाः प्रदिशो यस्य बाहू कस्मै देवाय हविषा विधेम॥

यं क्रन्दसी अवसा तस्तभाने अभ्यैक्षेतां मनसा रेजमाने।
यत्राधिसूर उदितौ व्येति कस्मै देवाय हविषा विधेम॥

येन द्यौरुग्रा पृथिवी च दृढे येन सुवस् स्तभितं ँयेन नाकः ।
यो अन्तरिक्षे रजसो विमानः कस्मै देवाय हविषा विधेम ॥

आपो ह यन्महती विश्वमायन्–दक्षन्दधाना जनयन्ती–रग्निं ।
ततो देवाना–न्निरवर्त्ततासुरेकः कस्मै देवाय हविषा विधेम ॥

यश्चिदापो महिना पर्यपश्यद्–द्क्षन्दधाना जनयन्ती–रग्निं ।
यो देवेष्वधि देव येक आसीत् कस्मै देवाय हविषा विधेम ॥

**अद्भ्यः संभूतो हिरण्यगर्भ इत्यष्टौ** ॥

एष हि देवः प्रदिशोऽनु सर्वाः पूर्वो हि जातः स उ गर्भे अन्तः ।
स विजायमानः सजनिष्यमाणः प्रत्यङ्–मुखा स्तिष्ठति विश्वतोमुखः ॥
विश्वतश्च–क्षुरुत विश्वतो मुखो विश्वतो हस्त उत विश्वतस्पात् ।
सं बाहुभ्यां नमति सं पतत्रैर्–द्यावा पृथिवी जनयन् देव एकः ॥
वेनस्तत् पश्यन्. विश्वा भुवनानि विद्वान्. यत्र विश्वं भवत्येक–नीळं ।
यस्मिन्निद৺ सञ्च विचैक৺ स ओतः प्रोतश्च विभुः प्रजासु ॥
प्रतद्वोचे अमृतन्नु विद्वान् गन्धर्वो नाम निहितं गुहासु । **3 (10)**

**T.A.6.1.4**

त्रीणि पदा निहिता गुहासु यस्तद्वेद सवितुः पिताऽसत् ॥
स नो बन्धुर्–जनिता स विधाता धामानि वेद भुवनानि विश्वा ।
यत्र देवा अमृतमान–शानास्तृतीये धामान्य-भ्यैरयन्त ॥
परि द्यावापृथिवी यन्ति सद्यः परि लोकान् परि दिशः परि सुवः ।
ऋतस्य तन्तुं ँविततं ँविचृत्य तदपश्यत् तदभवत् प्रजासु ॥
परीत्य लोकान् परीत्य भूतानि परीत्य सर्वाः प्रदिशो दिशश्च ।
प्रजापतिः प्रथमजा ऋतस्यात्मना–ऽऽत्मान–मभि–संबभूव ॥
सदसस्पति–मद्भुतं प्रियमिन्द्रस्य काम्यं । सनिं मेधा मयासिषं ॥
उद्दीप्यस्व जातवेदो ऽपघ्नन्निर्ऋर्.तिं मम । **4 (10)**

**T.A.6.1.5**

पशूꣳश्च मह्यमावह जीवनञ्च दिशो दिश ॥
मानो हिꣳसी ज्जातवेदो गामश्वं पुरुषं जगत् ।
अबिभ्रदग्न आगहि श्रिया मा परिपातय ॥
पुरुषस्य विद्म सहस्राक्षस्य महादेवस्य धीमहि ।
तन्नो रुद्रः प्रचोदयात् ॥
तत्पुरुषाय विद्महे महादेवाय धीमहि । तन्नो रुद्रः प्रचोदयात् ॥

तत्पुरुषाय विद्महे वक्रतुण्डाय धीमहि । तन्नो दन्तिः प्रचोदयात् ॥

तत्पुरुषाय विद्महे चक्रतुण्डाय धीमहि । **5 (10)**

**T.A.6.1.6**

तन्नो नन्दिः प्रचोदयात् ॥

तत्पुरुषाय विद्महे महासेनाय धीमहि । तन्नः षण्मुखः प्रचोदयात् ॥

तत्पुरुषाय विद्महे सुवर्णपक्षाय धीमहि । तन्नो गरुडः प्रचोदयात् ॥

वेदात्मनाय विद्महे हिरण्यगर्भाय धीमहि । तन्नो ब्रह्म प्रचोदयात् ॥

नारायणाय विद्महे वासुदेवाय धीमहि । तन्नो विष्णुः प्रचोदयात् ॥

वज्रनखाय विद्महे तीक्ष्ण–द९ष्ट्राय धीमहि । **6 (10)**

**T.A.6.1.7**

तन्नो नारसि९्हः प्रचोदयात् ॥

भास्कराय विद्महे महद्द्युतिकराय धीमहि ।

तन्नो आदित्यः प्रचोदयात् ॥

वैश्वानराय विद्महे लालीलाय धीमहि । तन्नो अग्निः प्रचोदयात् ॥

कात्यायनाय विद्महे कन्यकुमारि धीमहि । तन्नो दुर्गिः प्रचोदयात् ॥

सहस्रपरमा देवी शतमूला शताङ्कुरा ।

सर्वꣳ हरतु मे पापं दूर्वा दुःस्वप्न नाशनी॥
काण्डात् काण्डात् प्ररोहन्ती परुषः परुषः परि । **7 (10)**

**T.A.6.1.8**

एवा नो दूर्वे प्रतनु सहस्रेण शतेन च ॥
या शतेन प्रतनोषि सहस्रेण विरोहसि ।
तस्यास्ते देवीष्टके विधेम हविषा वयं ॥
अश्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसुन्धरा ।
शिरसा धारयिष्यामि रक्षस्व मां पदे पदे ॥
भूमिर्-धेनुर् धरणी लोकधारिणी ।
उधृताऽसि वराहेण कृष्णेन शत बाहुना ॥
मृत्तिके हन मे पापं यँन्मया दुष्कृतं कृतं ।
मृत्तिके ब्रह्मदत्ताऽसि काश्यपेनाभिमन्त्रिता ।
मृत्तिके देहि मे पुष्टिं त्वयि सर्वं प्रतिष्ठितं ॥ **8 (10)**

**T.A.6.1.9**

मृत्तिके प्रतिष्ठिते सर्वं तन्मे निर्णुद मृत्तिके ।
तया हतेन पापेन गच्छामि परमां गतिं ॥
यत इन्द्र भयामहे ततो नो अभयं कृधि ।

मघवन् छग्धि तव तन्न ऊतये विद्विषो विमृधो जहि ॥
स्वस्तिदा विशस्पतिर्–वृत्रहा विमृधो वशी ।
वृषेन्द्रः पुर एतु नः स्वस्तिदा अभयङ्करः ॥
स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्ताक्ष्र्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर् दधातु ॥
आपान्त–मन्युस्तृपलप्रभर्मा धुनिः शिमीवाञ्–छरुमाँ ऋजीषी ।
सोमो विश्वान्यतसा वनानि नार्वागिन्द्रं प्रतिमानानि देभुः ॥ **9 (10)**

**T.A.6.1.10**

ब्रह्म जज्ञानं प्रथमं पुरस्ताद्–विसीमतः सुरुचो वेन आवः ।
स बुध्निया उपमा अस्य विष्ठाः सतश्च योनि–मसतश्च विवः ॥
स्योना पृथिवि भवा नृक्षरा निवेशनी । यच्छा नः शर्म सप्रथाः ॥
गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीं ।
ईश्वरीँ सर्वभूतानां तामिहोपह्वये श्रियं ॥
श्रीर्मे भजतु । अलक्ष्मीर्मे नश्यतु ।
विष्णुमुखा वै देवा श्छन्दो–भिरिमान् ँल्लोका–ननपजय्य–मभ्यजयन्न् ।
महाँ इन्द्रो वज्रबाहुः षोडशी शर्म यच्छतु ॥ **10 (10)**

**T.A.6.1.11**

स्वस्ति नो मघवा करोतु हन्तु पाप्मानं ँयोऽस्मान् द्वेष्टि ॥

सोमान॑ स्वरणं कृणुहि ब्रह्मणस्पते । कक्षीवन्तं ँय औशिजं ।

शरीरं ँयज्ञशमलं कुसीदं तस्मिन् थ्सीदतु योऽस्मान् द्वेष्टि ॥

चरणं पवित्रं ँविततं पुराणं ँयेन पूत-स्तरति दुष्कृतानि ।

तेन पवित्रेण शुद्धेन पूता अति पाप्मान-मरातिं तरेम ॥

सजोषा इन्द्र सगणो मरुद्भिः सोमं पिब वृत्रहञ्छूर विद्वान् ।

जहि शत्रू॒ँ रप मृधो नुदस्वाथाभयं कृणुहि विश्वतो नः ॥

सुमित्रा न आप ओषधयः सन्तु दुर्मित्रास्तस्मै

भूयासुर् योऽस्मान् द्वेष्टि यञ्च वयं द्विष्मः ॥

आपो हिष्ठा मयो भुवस्ता न ऊर्जे दधातन । **11 (10)**

**T.A.6.1.12**

महेरणाय चक्षसे । यो वः शिवतमो रस-स्तस्य भाजयते ह नः ।

उशती-रिव मातरः । तस्मा अरङ्गमामवो यस्य क्षयाय जिन्वथ ।

आपो जनयथा च नः ॥

हिरण्यशृङ्गं ँवरुणं प्रपद्ये तीर्थं मे देहि याचितः ।

यन्मया भुक्त-मसाधूनां पापेभ्यश्च प्रतिग्रहः ॥

यन्मे मनसा वाचा कर्मणा वा दुष्कृतं कृतं ।

तन्न इन्द्रो वरुणो बृहस्पतिः सविता च पुनन्तु पुनः पुनः ॥

नमोऽग्नये–ऽफ्सुमते नम इन्द्राय नमो वरुणाय नमो

वारुण्यै नमोऽद्भ्यः ॥ **12 (10)**

**T.A.6.1.13**

यदपां क्रूरं ँयदमेद्ध्यं ँयदशान्तं तदपगच्छतात् ॥

अत्याशना–दतीपाना–द्यच्च उग्रात् प्रतिग्रहात् ।

तन्नो वरुणो राजा पाणिना ह्यवमर्.शतु ॥

सोऽहमपापो विरजो निर्मुक्तो मुक्तकिल्बिषः ।

नाकस्य पृष्ठमारुह्य गच्छेद् ब्रह्मसलोकतां ॥

यश्चाफ्सु वरुणः स पुनात्वघमर्षणः ॥

इमं मे गंगे यमुने सरस्वति शुतुद्रि स्तोमꣳ सचता परुष्णिया ।

असिक्निया मरुद्वृधे वितस्तया–ऽऽर्जीकीये शृणुह्या सुषोमया ॥

ऋतञ्च सत्यञ्चा–भीद्धा त्तपसोऽद्ध्यजायत ।

ततो रात्रि–रजायत ततः समुद्रो अर्णवः । **13 (10)**

**T.A.6.1.14**

समुद्रा–दर्णवा–दधि सम्ँवथ्सरो अजायत ।
अहोरात्राणि विदधद् (मिदधद्) विश्वस्य मिषतो वशी ॥
सूर्याचन्द्रमसौ धाता यथा पूर्व मकल्पयत् ।
दिवञ्च पृथिवीं चान्तरिक्ष मथो सुवः ॥
यत् पृथिव्या॑ रजस्स्व मान्तरिक्षे विरोदसी ।
इमा॑ स्तदापो वरुणः पुनात्वघमर्.षणः ॥
पुनन्तु वसवः पुनातु वरुणः पुनात्वघमर्.षणः ।
एष भूतस्य मद्ध्ये भुवनस्य गोप्ता ॥
एष पुण्यकृतां ँलोकानेष मृत्योर्. हिरण्मयं ।
द्यावापृथिव्योर्. हिरण्मय॑ सँश्रित॑ सुवः । **14 (10)**

**T.A.6.1.15**

स नः सुवः स॑ शिशाधि ॥
आर्द्रं ज्वलति ज्योति–रहमस्मि । ज्योतिर्–ज्वलति ब्रह्माहमस्मि ।
योऽहमस्मि ब्रह्माहमस्मि । अहमस्मि ब्रह्माहमस्मि ।
अहमेवाहं मां जुहोमि स्वाहा ॥
अकार्य–कार्यव कीर्णी स्तेनो भ्रूणहा गुरुतल्पगः ।

वरुणो–ऽपामघमर्.षण–स्तस्मात् पापात् प्रमुच्यते ॥

रजोभूमिस्त्वमा॑ रोदयस्व प्रवदन्ति धीराः ॥

आक्रान्थ्–समुद्रः प्रथमे विधर्म–ञ्जनयन् प्रजा भुवनस्य राजा ( ) ।

वृषा पवित्रे अधिसानो अव्ये बृहथ् सोमो

वावृधे सुवान इन्दुः ॥ **15 (11)**

***(पुरस्ताद् – यशो – गुहासु – मम – चक्रतुण्डाय धीमहि – तीक्ष्द ॑ष्ट्राय धीमहि – परि – प्रतिष्ठितं – देभुर् – यच्छतु – दधातना– द्भ्यो – ऽर्णवः – सुवो – राजैकं च)*** *(A1)*

<u>Special Korvai</u>

रुद्रो रुद्रश्च दन्तिश्च नन्दिः षण्मुख एव च ।

गरुडो ब्रह्म विष्णुश्च नारसि॑हस्तथैव च ।

आदित्योऽग्निश्च दुर्गिश्च क्रमेण द्वादशाम्भसि ।

<u>Special Korvai</u>

म म व च म सु वे ना व भा वै कात्यायनाय ।

## अनुवाकं – 2

**T.A.6.2.1**

जातवेदसे सुनवाम सोम–मरातीयतो निदहाति वेदः ।
स नः पर्.षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरिताऽत्यग्निः ॥
तामग्निवर्णां तपसा ज्वलन्तीं वैरोचनीं कर्मफलेषु जुष्टां ।
दुर्गां देवी॑ शरणमहं प्रपद्ये सुतरसि तरसे नमः ॥
अग्ने त्वं पारया नव्यो अस्मान्थ् स्वस्ति–भिरति दुर्गाणि विश्वा ।
पूश्च पृथ्वी बहुला न उर्वी भवा तोकाय तनयाय शम्ँयोः ॥
विश्वानि नो दुर्गहा जातवेदः सिन्धुं न नावा दुरिताऽतिपर्.षि ।
अग्ने अत्रिवन् मनसा गृणानोऽस्माकं बोद्ध्यविता तनूनां ॥
पृतनाजित॑ सहमान–मुग्रमग्नि॑ हुवेम परमाथ् सधस्थात् ।
स नः पर्.षदति दुर्गाणि विश्वा क्षामद्देवो अति दुरिताऽत्यग्निः ( ) ॥
प्रत्नोषि–कमीड्यो अद्ध्वरेषु सनाच्च होता नव्यश्च सथ्सि ।
स्वाञ्चाग्ने तनुवं पिप्रयस्वास्मभ्यञ्च सौभगमायजस्व ॥
गोभिर्–जुष्टमयुजो निषिक्तं तवेन्द्र विष्णो–रनुसञ्चरेम ।
नाकस्य पृष्ठमभि सम्ँवसानो वैष्णवीं ँलोक इह मादयन्तां ॥ **16 (14)**

*(दुरिताऽत्यग्निश्चत्वारि च) (A2)*

## अनुवाकं – 3

**T.A.6.3.1**

भू–रन्न–मग्नये पृथिव्यै स्वाहा ,

भुवोऽन्नं वायवेऽन्तरिक्षाय स्वाहा,

सुवरन्न–मादित्याय दिवे स्वाहा ,

भूर्भुवस्सुव–रन्नं चन्द्रमसे दिग्भ्यः स्वाहा ,

नमो देवेभ्यः स्वधा पितृभ्यो भूर्भुवस्सुव–रन्नमों ॥ **17 (1)**

## अनुवाकं – 4

**T.A.6.4.1**

भू–रग्नये पृथिव्यै स्वाहा,

भुवो वायवेऽन्तरिक्षाय स्वाहा ,

सुवरादित्याय दिवे स्वाहा ,

भू–र्भुवस्सुव–श्चन्द्रमसे दिग्भ्यः स्वाहा,

नमो देवेभ्यः स्वधा पितृभ्यो भूर्भुवस्सुव–रग्न ओं ॥ **18 (1)**

## अनुवाकं – 5

**T.A.6.5.1**

भू–रग्नये च पृथिव्यै च महते च स्वाहा ,

भुवो वायवे चान्तरिक्षाय च महते च स्वाहा ,

सुवरादित्याय च दिवे च महते च स्वाहा ,

भू–र्भुवस्सुव–श्चन्द्रमसे च नक्षत्रेभ्यश्च दिग्भ्यश्च महते च स्वाहा,

नमो देवेभ्यः स्वधा पितृभ्यो भूर्भुवस्सुवर् महरों ॥ **19 (1)**

## अनुवाकं – 6

**T.A.6.6.1**

पाहि नो अग्न एनसे स्वाहा । पाहि नो विश्ववेदसे स्वाहा ।

यज्ञं पाहि विभावसो स्वाहा । सर्वं पाहि शतक्रतो स्वाहा ॥ **20 (4)**

## अनुवाकं – 7

**T.A.6.7.1**

पाहि नो अग्न एकया । पाह्युत द्वितीयया । पाह्यूर्जं तृतीयया ।

पाहि गीर्भि–श्चतसृभिर् वसो स्वाहा ॥ **21 (4)**

## अनुवाकं – 8

**T.A.6.8.1**

यश्छन्दसा–मृषभो विश्वरूप–श्छन्दोभ्य श्छन्दाᳲस्या विवेश ।
सचाᳲ शिक्यः पुरो वाचोपनिष–दिन्द्रो ज्येष्ठ इन्द्रियाय ऋषिभ्यो
नमो देवेभ्यः स्वधा पितृभ्यो भूर्भुवस्सुव श्छन्द ओं ॥ **22 (2)**

## अनुवाकं – 9

**T.A.6.9.1**

नमो ब्रह्मणे धारणं मे अस्त्व–निराकरणं–धारयिता भूयासं
कर्णयोः श्रुतं माच्योढ्वं ममामुष्य ओं ॥ **23 (1)**

## अनुवाकं – 10

**T.A.6.10.1**

ऋतं तपः सत्यं तपः श्रुतं तपः शान्तं तपो दम स्तपः शमस्तपो
दानं तपो यज्ञं तपो भूर्भुवस्सुवर्–ब्रह्मै–तदुपास्यै–तत्तपः ॥ **24 (1)**

## अनुवाकं – 11

**T.A.6.11.1**

यथा वृक्षस्य संपुष्पितस्य दूराद् गन्धो वात्येवं पुण्यस्य कर्मणो
दूराद् गन्धो वाति यथाऽसिधारां कर्त्तेऽवहिता–मवक्रामे यद्युवे युवे
हवा विह्वयिष्यामि कर्त्तं पतिष्यामीत्येव–ममृता–दात्मानं जुगुप्सेत् ॥
**25 (1)**

## अनुवाकं – 12

**T.A.6.12.1**

अणो–रणीयान् महतो महीया–नात्मा गुहायां निहितोऽस्य जन्तोः ।
तमक्रतुं पश्यति वीतशोको धातुः प्रसादान्–महिमानमीशं ॥
सप्त प्राणाः प्रभवन्ति तस्माथ् सप्तार्चिषः समिधः सप्त जिह्वाः ।
सप्त इमे लोका येषु चरन्ति प्राणा गुहाशया–न्निहिताः सप्त सप्त ॥
अतः समुद्रा गिरयश्च सर्वेऽस्माथ् स्यन्दन्ते सिन्धवः सर्वरूपाः ।
अतश्च विश्वा ओषधयो रसाच्च येनैष भूत–स्तिष्ठत्यन्तरात्मा ॥
ब्रह्मा देवानां पदवीः कवीना–मृषिर्–विप्राणां महिषो मृगाणां ।
श्येनो गृध्राणा॒ᳪ स्वधितिर्–वनाना॒ᳪ सोमः पवित्र मत्येति रेभन्न् ॥
अजा मेकां ँलोहित–शुक्ल–कृष्णां बह्वीं प्रजां जनयन्ती॒ᳪ सरूपां ।
अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्त–
भोगामजोऽन्यः ॥ **26 (10)**

**T.A.6.12.2**

ह॒ᳪसः शुचिषद् वसु–रन्तरिक्ष–सद्धोता वेदिष–दतिथिर्–दुरोणसत् ।
नृषद्वर–सदृत–सद् व्योम–सदब्जा गोजा ऋतजा
अद्रिजा ऋतं बृहत् ॥

घृतं मिमिक्षिरे घृतमस्य योनिर्–घृते श्रितो घृतमुवस्य धाम ।
अनुष्वधमावह मादयस्व स्वाहा कृतं वृषभ वक्षि हव्यं ॥
समुद्रा दूर्मिर्–मधुमा॑ उदार–दुपा॑शुना सममृतत्व मानट् ।
घृतस्य नाम गुह्यं यँदस्ति जिह्वा देवाना–ममृतस्य नाभिः ॥
वयं नाम प्रब्रवामा घृतेनास्मिन्. यज्ञे धारयामा नमोभिः ।
उप ब्रह्मा शृणवच्छस्यमानं चतुः शृङ्गो ऽवमीद् गौर एतत् ॥
चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्.षे सप्त हस्तासो अस्य ।
त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्या॑ आविवेश ॥ **27 (10)**

**T.A.6.12.3**

त्रिधा हितं पणिभिर् गुह्यमानं गवि–देवासो घृतमन्वविन्दन्न् ।
इन्द्र एक॑ सूर्य एकं जजान वेना देक॑ स्वधया निष्टतक्षुः ॥
यो देवानां प्रथमं पुरस्ताद् विश्वाधियो रुद्रो महर्.षिः ।
हिरण्यगर्भं पश्यत जायमान॑ सनो देवः शुभया स्मृत्या सम्युँनक्तु ॥
यस्मात्परं नापर मस्ति किञ्चिद्यस्मान् नाणीयो न ज्यायोऽस्ति कश्चित् ।
वृक्ष इव स्तब्धो दिवि तिष्ठ–त्येकस्तेनेदं पूर्णं पुरुषेण सर्वं ॥

न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्व–मानशुः ।
परेण नाकं निहितं गुहायां विभ्राजदेतद् यतयो विशन्ति ॥
वेदान्त विज्ञान–सुनिश्चितार्थाः सन्यास योगाद्यतयः शुद्ध सत्त्वाः ।
ते ब्रह्मलोके तु परान्तकाले परामृतात् परिमुच्यन्ति सर्वे ( ) ॥
दह्रं विपापं परमेश्म भूतं यत् पुण्डरीकं पुरमद्ध्य सꣳस्थं ।
तत्रापि दह्रं गगनं विशोक–स्तस्मिन्. यदन्तस्त–दुपासितव्यं ॥
यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः ।
तस्य प्रकृति–लीनस्य यः परः स महेश्वरः ॥ **28 (14)**

*(अजोऽन्य – आविवेश – सर्वे चत्वारि च) (A12)*

## अनुवाकं – 13

**T.A.6.13.1**

सहस्रशीर्.षं देवं विश्वाक्षं विश्व शं भुवं ।
विश्वं नारायणं देवमक्षरं परमं पदं॥
विश्वतः परमान्नित्यं विश्वं नारायणꣳ हरिं ।
विश्वमेवेदं पुरुष–स्तद् विश्वमुपजीवति ॥
पतिं विश्वस्यात्मेश्वरꣳ शाश्वतꣳ शिवमच्युतं ।

नारायणं महाज्ञेयं ँविश्वात्मानं परायणं ॥
नारायण परो ज्योतिरात्मा नारयणः परः ।
नारायण परं ब्रह्म तत्त्वं नारायणः परः ।
नारायण परो ध्याता ध्यानं नारायणः परः ॥
यच्च किञ्चिज्–जगथ् सर्वं दृश्यते श्रूयतेऽपि वा । **29 (10)**

**T.A.6.13.2**

अन्तर् बहिश्च तथ् सर्वं ँव्याप्य नारायणः स्थितः ॥
अनन्त मव्ययं कवि॑ समुद्रेऽन्तं ँविश्व शंभुवं ।
पद्मकोश–प्रतीकाश॑ हृदयं चाप्यधोमुखं ॥
अधो निष्ट्या वितस्त्यान्ते नाभ्यामुपरि तिष्ठति ।
ज्वालमाला कुलं भाती विश्वस्यायतनं महत् ॥
सन्तत॑ शिलाभिस्तु लंबत्या कोशसन्निभं ।
तस्यान्ते सुषिर॑ सूक्ष्मं तस्मिन्थ् सर्वं प्रतिष्ठितं ॥
तस्य मद्ध्ये महानग्निर् विश्वार्चिर् विश्वतो मुखः ।
सोऽग्रभुग् विभजन् तिष्ठन्–नाहार–मजरः कविः ।
तिर्यगूर्ध्व मधः शायी रश्मयस्तस्य सन्तता ( ) ॥

सन्तापयति स्वं देहमापादतल मस्तकः ।
तस्य मद्ध्ये वह्निशिखा अणीयोद्ध्र्वा व्यवस्थितः ॥
नीलतो यद मद्ध्यस्थाद् विद्युल्लेखेव भास्वरा ।
नीवार शूकवत्तन्वी पीता भास्वत्यणूपमा ॥
तस्याः शिखाया मद्ध्ये परमात्मा व्यवस्थितः ।
स ब्रह्म स शिवः स हरिः सेन्द्रः सोऽक्षरः परमः स्वराट् ॥ **30 (16)**

*(अपि वा – सन्तता षट् च) (A13)*

## <u>अनुवाकं – 14</u>

**<u>T.A.6.14.1</u>**

आदित्यो वा एष एतन् मण्डलं तपति तत्र ता ऋचस्तदृचा मण्डलꣳ
स ऋचां ँलोकोऽथय एष एतस्मिन् मण्डलेऽर्चिर् दीप्यते तानि
सामानि स साम्नां ँलोकोऽथ य एष एतस्मिन् मण्डलेऽर्चिषि
पुरुषस्तानि यजूꣳषि स यजुषा मण्डलꣳ स यजुषां ँलोकः सैषा
त्रय्येव विद्या तपति य एषोऽन्त–रादित्ये हिरण्मयः पुरुषः ॥ **31 (1)**

## अनुवाकं – 15

**T.A.6.15.1**

आदित्यो वै तेज ओजो बलं यँश–श्चक्षुः श्रोत्रमात्मा मनो मन्युर्–
मनुर्–मृत्युः सत्यो मित्रो वायुराकाशः प्राणो लोकपालः कः किं
कं तथ् सत्यमन्न–ममृतो जीवो विश्वः कतमः स्वयंभु ब्रह्मै तदमृत
एष पुरुष एष भूताना–मधिपतिर्–ब्रह्मणः सायुज्य७ सलोकता–
माप्नो–त्येतासामेव देवताना७ सायुज्य७ सार्ष्टिता७ समान
लोकता–माप्नोति य एवं वेँदेत्युपनिषत् ॥ **32 (1)**

## अनुवाकं – 16

**T.A.6.16.1**

निधनपतये नमः । निधनपतान्तिकाय नमः ।

ऊद्ध्वार्य नमः । ऊद्ध्वलिङ्गाय नमः ।

हिरण्याय नमः । हिरण्यलिङ्गाय नमः ।

सुवर्णाय नमः । सुवर्णलिङ्गाय नमः ।

दिव्याय नमः । दिव्यलिङ्गाय नमः । **33 (10)**

**T.A.6.16.2**

भवाय नमः । भवलिङ्गाय नमः ।

शर्वाय नमः । शर्वलिङ्गाय नमः ।

शिवाय नमः । शिवलिङ्गाय नमः ।

ज्वलाय नमः । ज्वललिङ्गाय नमः ।

आत्माय नमः । आत्मलिङ्गाय नमः ।

परमाय नमः । परमलिङ्गाय नमः ।

एतथ्सोमस्य सूर्यस्य सर्वलिङ्ग॑ स्थापयति पाणिमन्त्रं

पवित्रं ॥ **34 (13)**

## अनुवाकं – 17

**T.A.6.17.1**

सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः ।

भवे भवे नातिभवे भवस्व मां । भवोद्भवाय नमः ॥ **35 (3)**

## अनुवाकं – 18

**T.A.6.18.1**

वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः

कलविकरणाय नमो बलविकरणाय नमो बलाय नमो

बलप्रमथनाय नमः सर्वभूतदमनाय नमो मनोन्मनाय नमः ॥ **36 (1)**

## अनुवाकं – 19

**T.A.6.19.1**

अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः ।

सर्वेभ्यः सर्व शर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः ॥ **37 (2)**

## अनुवाकं – 20

**T.A.6.20.1**

तत्पुरुषाय विद्महे महादेवाय धीमहि ।

तन्नो रुद्रः प्रचोदयात् ॥ **38 (2)**

## अनुवाकं – 21

**T.A.6.21.1**

ईशानः सर्वविद्याना– मीश्वरः सर्वभूतानां ब्रह्माधिपतिर् ब्रह्मणोऽधिपतिर्

ब्रह्मा शिवो मे अस्तु सदाशिवोम् ॥ **39 (1)**

## अनुवाकं – 22

**T.A.6.22.1**

नमो हिरण्यबाहवे हिरण्यवर्णाय हिरण्यरूपाय हिरण्यपतये ऽंबिकापतय

उमापतये पशुपतये नमो नमः ॥ **40 (1)**

## अनुवाकं – 23

**T.A.6.23.1**

ऋत७ं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलं ।

ऊर्ध्वरेतं ँविरूपाक्षं ँविश्वरूपाय वै नमो नमः ॥ **41 (2)**

## अनुवाकं – 24

**T.A.6.24.1**

सर्वो वै रुद्रस्तस्मै रुद्राय नमो अस्तु ।

पुरुषो वै रुद्रः सन्महो नमो नमः ।

विश्वं भूतं भुवनं चित्रं बहुधा जातं जायमानं च यत् ।

सर्वो ह्येष रुद्रस्तस्मै रुद्राय नमो अस्तु ॥ **42 (4)**

## अनुवाकं – 25

**T.A.6.25.1**

कद्रुद्राय प्रचेतसे मीढुष्टमाय तव्यसे । वोचेम शन्तम७ं हृदे ॥

सर्वोह्येष रुद्रस्तस्मै रुद्राय नमो अस्तु ॥ **43 (3)**

## अनुवाकं – 26

**T.A.6.26.1**

यस्य वै कङ्कत्यग्नि–होत्रहवणी भवति प्रत्येवा–स्याहुतय–

स्तिष्ठन्त्यथो प्रतिष्ठित्यै ॥ **44 (1)**

## अनुवाकं – 27

**T.A.6.27.1**

**(This Expansion is appearing in T.S.1.2.14.1 for कृणुष्व पाज इति पञ्च ।**

कृणुष्व पाजः प्रसितिन्न पृथ्वीँ याहि राजे वामवा॒ँ इभेन ।
तृष्वीमनु प्रसितिं दूणानोऽस्ताऽसि विद्ध्य रक्ष सस्तपिष्ठैः ॥ 1

तव भ्रमास आशुया पतन्त्यनु स्पृश धृषता शोशुचानः ।
तपू॒ँष्यग्ने जुह्वा पतंगान सन्दितो विसृज विष्व गुल्काः ॥ 2

प्रतिस्पशो विसृज तूर्णि तमो भवा पायुर् विशो अस्या अदब्धः ।
यो नो दूरे अघश॒ँसो यो अन्त्यग्ने माकिष्टे व्यथिरा
दधर्.षीत् ॥ 3

उदग्ने तिष्ठ प्रत्या तनुष्वन्य मित्रा॒ँ ओषतात् तिग्महेते ।
यो नो अराति॒ँ समिधान चक्रे नीचातं धक्ष्यत सन्न शुष्कं ॥ 4

ऊद्ध्र्वो भव प्रतिविद्ध्या–ध्यस्मदा विष्कृणुष्व दैव्यान्यग्ने ।
अवस्थिरा तनुहि यातु जूनां जामिमजामिं प्रमृणीहि शत्रून् ॥ 5

कृणुष्व पाज इति पञ्च ॥ 45 (1)

## अनुवाकं – 28

**T.A.6.28.1**

अदितिर्-देवा गन्धर्वा मनुष्याः पितरो-ऽसुरा-स्तेषा९ँ सर्व भूतानां
माता मेदिनी महता मही सावित्री गायत्री जगत्युर्वी पृथ्वी बहुला
विश्वा भूता कतमा काया सा सत्ये-त्यमृतेति वसिष्ठः ॥ 46 (1)

## अनुवाकं – 29

**T.A.6.29.1**

आपो वा इद९ँ सर्वं ँविश्वा भूतान्यापः प्राणा वा आपः पशव
आपोऽन्नमापो -ऽमृतमापः सम्राडापो विराडापः स्वराडाप
श्छन्दा७ँस्यापो ज्योती७ँष्यापो यजू७ँष्यापः सत्यमापः सर्वा
देवता आपो भूर्भुवस्सुवराप ओं ॥ 47 (1)

## अनुवाकं – 30

**T.A.6.30.1**

आपः पुनन्तु पृथिवीं पृथिवी पूता पुनातु मां ।
पुनन्तु ब्रह्मणस्पतिर् ब्रह्म पूता पुनातु मां ॥

यदुच्छिष्ट–मभोज्यं यँद्वा दुश्चरितं मम ।
सर्वं पुनन्तु मामापो–ऽसताञ्च प्रतिग्रह७ स्वाहा ॥ **48 (4)**

## अनुवाकं – 31

**T.A.6.31.1**

अग्निश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः ।
पापेभ्यो रक्षन्तां । यदह्ना पापमकार्.षं ।
मनसा वाचा हस्ताभ्यां । पद्भ्या–मुदरेण शिश्ना ।
अहस्तदवलुंपतु । यत्किञ्च दुरितं मयि ।
इदमह–माममृत योनौ ।
सत्ये ज्योतिषि जुहोमि स्वाहा ॥ **49 (9)**

## अनुवाकं – 32

**T.A.6.32.1**

सूर्यश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः ।
पापेभ्यो रक्षन्तां । यद्रात्रिया पापमकार्.षं ।
मनसा वाचा हस्ताभ्यां । पद्भ्या–मुदरेण शिश्ना ।
रात्रि–स्तदवलुंपतु । यत्किञ्च दुरितं मयि ।
इदमह–माममृत योनौ । सूर्ये ज्योतिषि जुहोमि स्वाहा ॥ **50 (9)**

## अनुवाकं – 33

**T.A.6.33.1**

ओमित्येकाक्षरं ब्रह्म । अग्निर्देवता ब्रह्म इत्यार्.षं ।

गायत्रं छन्दं परमात्मं सरूपं । सायुज्यं ँविनियोगं ॥ **51 (4)**

## अनुवाकं – 34

**T.A.6.34.1**

आयातु वरदा देवी अक्षरं ब्रह्म संमितं ।

गायत्रीं छन्दसां मातेदं ब्रह्म जुषस्व मे ।

यदह्नात् कुरुते पापं तदह्नात् प्रतिमुच्यते ।

यद् रात्रियात् कुरुते पापं तद् रात्रियात् प्रतिमुच्यते ।

सर्व वर्णे महादेवि सन्ध्या विद्ये सरस्वति ॥ **52 (5)**

## अनुवाकं – 35

**T.A.6.35.1**

ओजोऽसि सहोऽसि बलमसि भ्राजोऽसि देवानां धामनामाऽसि

विश्वमसि विश्वायुः सर्वमसि सर्वायु–रभिभूरों–गायत्री–मावाहयामि

सावित्री–मावाहयामि सरस्वती–मावाहयामि छन्दर्.षी–नावाहयामि

श्रिय–मावाहयामि गायत्रिया गायत्री छन्दो विश्वामित्र

ऋषिः सविता देवताऽग्निर्मुखं ब्रह्मा शिरो विष्णुर्.हृदयꣳ रुद्रः

शिखा पृथिवीयोनिः प्राणापान–व्यानोदान–समाना सप्राणा श्वेतवर्णा
साङ्ख्यायन–सगोत्रा गायत्री चतुर्वि॒ꣳशत्यक्षरा त्रिपदा
षट्कुक्षिः पञ्च शीर्.षोपनयने विनियोग,
ओं भूः । ओं भुवः । ओ॒ꣳ सुवः । ओं महः । ओं जनः ।
ओं तपः । ओ॒ꣳ सत्यं । ओं तथ् सवितुर्वरेण्यं भर्गो देवस्य धीमहि ।
धियो यो नः प्रचोदयात् ।
ओमापो ज्योती रसोऽमृतं ब्रह्म भूर्भुवस्सुवरों ॥ **53 (10)**

# अनुवाकं – 36

**T.A.6.36.1**

उत्तमे शिखरे जाते भूम्यां पर्वत मूद्र्धनि ।
ब्राह्मणेभ्यो–ऽभ्यनुज्ञाता गच्छ देवि यथासुखं ॥
स्तुतो मया वरदा वेदमाता प्रचोदयन्ती पवने द्विजाता ।
आयुः पृथिव्यां–द्रविणं ब्रह्मवर्चसं मह्यं दत्वा प्रजातुं
ब्रह्मलोकं ॥ **54 (4)**

## अनुवाकं – 37

**T.A.6.37.1**

घृणिः सूर्य आदित्यो न प्रभा–वात्यक्षरं । मधुक्षरन्ति तद् रसं ।

सत्यं वै तद् रस–मापो ज्योतीरसोऽमृतं ब्रह्म

भूर्भुवस्सुवरों ॥ **55 (3)**

## अनुवाकं – 38

**T.A.6.38.1**

ब्रह्म मेतु मां । मधु मेतु मां । ब्रह्म–मेव मधु मेतु मां ॥

यास्ते सोम प्रजावथ्सो–ऽभिसो अहं । दुःष्वप्नहन् दुरुष्वह ।

यास्ते सोम प्राणा॰स्तां जुहोमि ॥

त्रिसुपर्ण मयाचितं ब्राह्मणाय दद्यात् । ब्रह्महत्यां वा एते घ्नन्ति ।

ये ब्राह्मणा–स्त्रिसुपर्णं पठन्ति । ते सोमं प्राप्नुवन्ति ।

आसहस्रात् पंक्तिं पुनन्ति । ओं ॥ **56 (12)**

## अनुवाकं – 39

**T.A.6.39.1**

ब्रह्म मेधया । मधु मेधया । ब्रह्ममेव मधु मेधया ॥

अद्या नो देव सवितः प्रजावथ्सावीः सौभगं ।

परा दुःष्वप्नियं सुव ।

विश्वानि देव सवितर्–दुरितानि परासुव । यद् भद्रं तन्म आसुव ॥

मधुवाता ऋतायते मधुक्षरन्ति सिन्धवः । माद्ध्वीर्नः सन्त्वोषधीः ।

मधुनक्त मुतोषसि मधुमत् पार्थिव॑ रजः । मधुद्यौरस्तु नः पिता ।

मधुमान्नो वनस्पतिर्–मधुमा॑ अस्तु सूर्यः ।

माद्ध्वी गावो भवन्तु नः ॥

य इमं त्रिसुपर्ण–मयाचितं ब्राह्मणाय दद्यात् ।

भ्रूणहत्यां ँवा एते घ्नन्ति । ये ब्राह्मणा–स्त्रिसुपर्णं पठन्ति ।

ते सोमं प्राप्नुवन्ति । आसहस्रात् पंक्तिं पुनन्ति । ओं ॥ **57 (19)**

## अनुवाकं – 40

**T.A.6.40.1**

ब्रह्म मेधवा । मधु मेधवा । ब्रह्ममेव मधु मेधवा ॥

ब्रह्मा देवानां पदवीः कवीना–मृषिर् विप्राणां महिषो मृगाणां ।

श्येनो गृद्ध्राणा॑ स्वधितिर्–वनाना॑ सोमः पवित्र–मत्येति रेभन् ॥

ह॑सः शुचिषद् वसुरन्तरिक्ष सद्धोता– वेदिष–दतिथिर्–

दुरोणसत् ।

नृषद्वर–सदृत–सद् व्योम–सदब्जा– गोजा ऋतजा
अद्रिजा ऋतं बृहत् ॥
ऋचेत्वा रुचेत्वा समिथ् स्रवन्ति सरितो न धेनाः ।
अन्तर्. हृदा मनसा पूयमानाः । घृतस्य धारा अभिचाकशीमि ।
हिरण्ययो वेतसो मद्ध्य आसां ।
तस्मिन्थ् सुपर्णो मधुकृत् कुलायी भजन्नास्ते मधु देवताभ्यः ।
तस्या सते हरयः सप्ततीरे स्वधां दुहाना अमृतस्य धारां ।
य इदं त्रिसुपर्ण–मयाचितं ब्राह्मणाय दद्यात् ।
वीरहत्यां ँवा एते घ्नन्ति । ये ब्राह्मणा–स्त्रिसुपर्णं पठन्ति ।
ते सोमं प्राप्नुवन्ति । आसहस्रात् पंक्तिं पुनन्ति । ओं ॥ **58 (19)**

## अनुवाकं – 41

**T.A.6.41.1**

मेधादेवी जुषमाणा न आगाद् विश्वाची भद्रा सुमनस्य माना ।
त्वया जुष्टा नुदमाना दुरुक्तान् बृहद्वदेम विदथे सुवीराः ॥
त्वया जुष्ट ऋषिर् भवति देवि त्वया ब्रह्माऽऽगतश्री रुत त्वया ।
त्वया जुष्टश्चित्रं ँविन्दते वसु सा नो जुषस्व द्रविणो नमेधे ॥ **59 (4)**

## अनुवाकं – 42

**T.A.6.42.1**

मेधां म इन्द्रो ददातु मेधां देवी सरस्वती ।
मेधां मे अश्विना–वुभावाधत्तां पुष्करस्रजा ॥
अप्सरासु च या मेधा गन्धर्वेषु च यन्मनः ।
दैवीं मेधा सरस्वती सा मां मेधा सुरभिर् जुषता॰ स्वाहा ॥ **60 (4)**

## अनुवाकं – 43

**T.A.6.43.1**

आमां मेधा सुरभिर् विश्वरूपा हिरण्यवर्णा जगती जगम्या ।
ऊर्जस्वती पयसा पिन्वमाना सा मां मेधा सुप्रतीका जुषन्तां ॥ **61 (2)**

## अनुवाकं – 44

**T.A.6.44.1**

मयि मेधां मयि प्रजां मय्यग्निस्तेजो दधातु मयि मेधां मयि प्रजां
मयीन्द्र इन्द्रियं दधातु मयि मेधां मयि प्रजां मयि सूर्यो भ्राजो
दधातु ॥ **62 (1)**

## अनुवाकं – 45

**T.A.6.45.1**

अपैतु मृत्यु–रमृतन्न आगन् वैवस्वतो नो अभयङ्कृणोतु ।
पर्णं ँवनस्पते रिवाभिनः शीयता॒ रयिः सचतान्नः
शचीपतिः ॥ **63 (2)**

## अनुवाकं – 46

**T.A.6.46.1**

परं मृत्यो अनु परेहि पन्थां ँयस्तेस्व इतरो देवयानात् ।
चक्षुष्मते शृण्वते ते ब्रवीमि मानः प्रजा॒ रीरिषो मोत
वीरान् ॥ **64 (2)**

## अनुवाकं – 47

**T.A.6.47.1**

वातं प्राणं मनसा न्वारभामहे प्रजापतिं ँयो भुवनस्य गोपाः ।
सनो मृत्यो स्त्रायतां पात्व॒हसो ज्योग् जीवा
जरामशीमहि ॥ **65 (2)**

## अनुवाकं – 48

**T.A.6.48.1**

अमुत्र भूयादध यद्यमस्य बृहस्पते अभिशस्तेर मुञ्चः ।
प्रत्यौहता मश्विना मृत्यु मस्माद् देवानामग्ने भिषजा शचीभिः ॥ 66 (2)

## अनुवाकं – 49

**T.A.6.49.1**

हरिꣳ हरन्त– मनुयन्ति देवा विश्वस्येशानं वृषभं मतीनां ।
ब्रह्म सरूप–मनुमेदमागा–दयनं मा विवधीर् विक्रमस्व ॥ 67 (2)

## अनुवाकं – 50

**T.A.6.50.1**

शल्कैरग्नि–मिन्धान उभौ लोकौ सनेमहं ।
उभयो र्लोकयार्. ऋध्द्वाऽति मृत्युं तराम्यहं ॥ 68 (2)

## अनुवाकं – 51

**T.A.6.51.1**

मा छिदो मृत्यो मा वधीर्मा मे बलं ँविवृहो मा प्रमोषीः ।
प्रजां मा मे रीरिष आयुरुग्र नृचक्षसं त्वा हविषा विधेम ॥ 69 (2)

## अनुवाकं – 52

**T.A.6.52.1**

मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितं ।

मा नो वधीः पितरं मोत मातरं प्रिया मा नस्तनुवो

रुद्र रीरिषः ॥ **70 (2)**

## अनुवाकं – 53

**T.A.6.53.1**

मा नस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः ।

वीरान्मा नो रुद्र भामितोवधीर्.–हविष्मन्तो नमसा विधेम ते ॥ **71 (2)**

## अनुवाकं – 54

**T.A.6.54.1**

प्रजापते न त्वदेता–न्यन्यो विश्वा जातानि परिता बभूव ।

यत् कामास्ते जुहुमस्तन्नो अस्तु वय७ स्याम पतयो रयीणां ॥ **72 (2)**

## अनुवाकं – 55

**T.A.6.55.1**

स्वस्तिदा विशस्पतिर् वृत्रहा विमृधो वशी ।

वृषेन्द्रः पुर एतु नस्स्वस्तिदा अभयं करः ॥ **73 (2)**

## अनुवाकं - 56

**T.A.6.56.1**

त्र्यंबकं यजामहे सुगन्धिं पुष्टिवर्धनं ।
उर्वारुकमिव बन्धनान्-मृत्योर् मुक्षीय माऽमृतात् ॥ **74 (2)**

## अनुवाकं - 57

**T.A.6.57.1**

ये ते सहस्रमयुतं पाशा मृत्यो मर्त्याय हन्तवे ।
तान्. यज्ञस्य मायया सर्वानव यजामहे ॥ **75 (2)**

## अनुवाकं - 58

**T.A.6.58.1**

मृत्यवे स्वाहा मृत्यवे स्वाहा ॥ **76 (1)**

## अनुवाकं - 59

**T.A.6.59.1**

देवकृतस्यैनसो-ऽवयजनमसि स्वाहा ।
मनुष्यकृतस्यैनसो ऽवयजनमसि स्वाहा ।
पितृकृतस्यैनसो ऽवयजनमसि स्वाहा ।
आत्मकृतस्यैनसो ऽवयजनमसि स्वाहा ।
अन्यकृतस्यैनसो ऽवयजनमसि स्वाहा ।

अस्मत्कृतस्यैनसो ऽवयजनमसि स्वाहा ।
यद्दिवा च नक्तं चैनश्चकृम तस्या वयजनमसि स्वाहा ।
यथ् स्वपन्तश्च जाग्रत–श्चैनश्च–कृम तस्या वयजनमसि स्वाहा ।
यथ् सुषुप्तश्च जाग्रत–श्चैनश्च–कृम तस्या वयजनमसि स्वाहा ।
यद् विद्वा९्सश्चा विद्वा९्सश्चैनश्च–कृम तस्या वयजनमसि स्वाहा ।
एनस एनसो वयजनमसि स्वाहा॥ **77 (11)**

## अनुवाकं – 60

**T.A.6.60.1**

यद्वो देवाश्चकृम जिह्वया गुरुमनसो वा प्रयुती देव हेडनं ।
अरावायो नो अभिदुच्छुनायते तस्मिन् तदेनो वसवो
निधेतन स्वाहा ॥ **78 (2)**

## अनुवाकं – 61

**T.A.6.61.1**

कामोऽकार्षीन् नमो नमः ।
कामोऽकार्षीत् कामः करोति नाहं करोमि
कामः कर्त्ता नाहं कर्त्ता कामः कारयिता नाहं कारयिता एष ते
काम कामाय स्वाहा ॥ **79 (2)**

## अनुवाकं – 62

**T.A.6.62.1**

मन्युरकार्षीन् नमो नमः ।

मन्युरकार्षीन् मन्युः करोति नाहं करोमि मन्युः कर्त्ता नाहं कर्त्ता

मन्युः कारयिता नाहं कारयिता एष ते मन्यो मन्यवे स्वाहा ॥ **80 (2)**

## अनुवाकं – 63

**T.A.6.63.1**

तिलाञ्जुहोमि सरसाꣳ सपिष्टान् गन्धार मम चित्ते रमन्तु स्वाहा ॥

गावो हिरण्यं धनमन्नपानꣳ सर्वेषाꣳ श्रियै स्वाहा ॥

श्रियञ्च लक्ष्मिञ्च पुष्टिञ्च कीर्त्तिं चा नृण्यतां ।

ब्रह्मण्यं बहुपुत्रतां । श्रद्धामेधे प्रजाः सन्ददातु स्वाहा ॥ **81 (5)**

## अनुवाकं – 64

**T.A.6.64.1**

तिलाः कृष्णा-स्तिलाः श्वेता-स्तिलाः सौम्या वशानुगाः ।

तिलाः पुनन्तु मे पापं यत्किञ्चिद् दुरितं मयि स्वाहा ॥

चोरस्यान्नं नवश्राद्धं ब्रह्महा गुरुतल्पगः ।

गोस्तेयꣳ सुरापानं भ्रूणहत्या तिला शान्तिꣳ शमयन्तु स्वाहा ॥

श्रीश्च लक्ष्मीश्च पुष्टीश्च कीर्त्तिं चा नृण्यतां ।
ब्रह्मण्यं बहुपुत्रतां ।
श्रद्धामेधे प्रज्ञातु जातवेदः संददातु स्वाहा ॥ **82 (7)**

## अनुवाकं – 65

**T.A.6.65.1**

प्राणापान–व्यानोदान–समाना मे शुद्ध्यन्तां
ज्योति रहं ँविरजा विपाप्मा भूयास॒ स्वाहा ॥
वाङ्–मन–श्चक्षुः–श्रोत्र–जिह्वा–घ्राण–रेतो–बुद्ध्याकूतिः सङ्कल्पा
मे शुद्ध्यन्तां ज्योति रहं ँविरजा विपाप्मा भूयास॒ स्वाहा ॥
त्वक्–चर्म–मा॒ंस–रुधिर–मेदो–मज्जा–स्नायवो–ऽस्थीनि
मे शुद्ध्यन्तां ज्योति रहं ँविरजा विपाप्मा भूयास॒ स्वाहा ॥
शिरः पाणि पाद पार्श्व पृष्ठो–रूदर–जङ्घ–शिश्नोपस्थ पायवो
मे शुद्ध्यन्तां ज्योति रहं ँविरजा विपाप्मा भूयास॒ स्वाहा ॥
उत्तिष्ठ पुरुष हरित–पिङ्गल लोहिताक्षि देहि देहि ददापयिता
मे शुद्ध्यन्तां ज्योति रहं ँविरजा विपाप्मा भूयास॒ स्वाहा ॥ **83 (5)**

## अनुवाकं – 66

**T.A.6.66.1**

पृथिव्याप स्तेजो वायु–राकाशा मे शुद्ध्यन्तां

ज्योति रहं ँविरजा विपाप्मा भूयास॒ स्वाहा ॥

शब्द–स्पर्.श–रूपरस–गन्धा मे शुद्ध्यन्तां

ज्योति रहं ँविरजा विपाप्मा भूयास॒ स्वाहा ॥

मनो–वाक्–काय–कर्माणि मे शुद्ध्यन्तां

ज्योति रहं ँविरजा विपाप्मा भूयास॒ स्वाहा ॥

अव्यक्तभावै–रहङ्कारैर् ज्योति रहं ँविरजा विपाप्मा भूयास॒ स्वाहा ॥

आत्मा मे शुद्ध्यन्तां ज्योति रहं ँविरजा विपाप्मा भूयास॒ स्वाहा ॥

अन्तरात्मा मे शुद्ध्यन्तां ज्योति रहं ँविरजा विपाप्मा भूयास॒ स्वाहा ॥

परमात्मा मे शुद्ध्यन्तां ज्योति रहं विँरजा विपाप्मा भूयास॒ स्वाहा ॥

क्षुधे स्वाहा ॥ क्षुत्पिपासाय स्वाहा ॥

विविट्यै स्वाहा ॥ ऋग्विधानाय स्वाहा ॥ कषोत्काय स्वाहा ॥

क्षुत्पिपासामलं ज्येष्ठामलक्ष्मीर् नाशयाम्यहं ।

अभूति–मसमृद्धिञ्च सर्वां (सर्वा) निर्णुद मे पाप्मान॒ स्वाहा ॥

अन्नमय-प्राणमय-मनोमय-विज्ञानमय-मानन्दमय-मात्मा
मे शुद्ध्यन्तां ज्योति रहं विरजा विपाप्मा भूयास स्वाहा॥ **84 (15)**

## अनुवाकं – 67

**T.A.6.67.1**

अग्नये स्वाहा । विश्वेभ्यो देवेभ्यः स्वाहा । ध्रुवाय भूमाय स्वाहा ।
ध्रुवक्षितये स्वाहा । अच्युतक्षितये स्वाहा । अग्नये स्विष्टकृते स्वाहा ॥
धर्माय स्वाहा । अधर्माय स्वाहा । अद्भ्यः स्वाहा ।
ओषधिवनस्पतिभ्यः स्वाहा । **85 (10)**

**T.A.6.67.2**

रक्षोदेवजनेभ्यः स्वाहा ।
गृह्याभ्यः स्वाहा । अवसानेभ्यः स्वाहा । अवसानपतिभ्यः स्वाहा ।
सर्वभूतेभ्यः स्वाहा । कामाय स्वाहा । अन्तरिक्षाय स्वाहा ।
यदेजति जगति यच्च चेष्टति नाम्नो भागोऽयं नाम्ने स्वाहा ।
पृथिव्यै स्वाहा । अन्तरिक्षाय स्वाहा । **86 (10)**

**T.A.6.67.3**

दिवे स्वाहा । सूर्याय स्वाहा । चन्द्रमसे स्वाहा । नक्षत्रेभ्यः स्वाहा ।
इन्द्राय स्वाहा । बृहस्पतये स्वाहा । प्रजापतये स्वाहा ।

ब्रह्मणे स्वाहा । स्वधा पितृभ्यः स्वाहा ।

नमो रुद्राय पशुपतये स्वाहा । **87 (10)**

**T.A.6.67.4**

देवेभ्यः स्वाहा । पितृभ्यः स्वधाऽस्तु । भूतेभ्यो नमः ।

मनुष्येभ्यो हन्ता । प्रजापतये स्वाहा । परमेष्ठिने स्वाहा॥

यथा कूपः शतधारः सहस्रधारो अक्षितः ।

एवा मे अस्तु धान्य७ँ सहस्रधार–मक्षितं । धनधान्यै स्वाहा ॥

ये भूताः प्रचरन्ति दिवानक्तं बलि–मिच्छन्तो वितुदस्य प्रेष्याः ( ) ।

तेभ्यो बलिं पुष्टिकामो हरामि मयि पुष्टिं पुष्टिपतिर् दधातु

स्वाहा ॥ **88 (11)**

*(ओषधिवनस्पतिभ्यः स्वाहा – ऽन्तरिक्षाय स्वाहा – नमो रुद्राय पशुपतये स्वाहा – वितुदस्य प्रेष्या एकं च) (A67)*

## अनुवाकं – 68

**T.A.6.68.1**

ओं तद् ब्रह्म । ओं तद् वायुः । ओं तदात्मा । ओं तथ् सत्यं ।

ओं तथ् सर्वं । ओं तत् पुरोर् नमः ।

अन्तश्चरति भूतेषु गुहायां विश्व मूर्त्तिषु ।

त्वं ँयज्ञस्त्वं ँवषट्कारस्त्व-मिद्रस्त्व७ं रुद्रस्त्वं-ँविष्णुस्त्वं ब्रह्मत्वं प्रजापतिः ।

त्वं तदाप आपो ज्योती रसोऽमृतं ब्रह्म भूर्भुवस्सुवरों ॥ **89 (9)**

## अनुवाकं – 69

**T.A.6.69.1**

श्रद्धायां प्राणे निविष्टोऽमृतं जुहोमि ।

श्रद्धायामपाने निविष्टोऽमृतं जुहोमि ।

श्रद्धायां ँव्याने निविष्टोऽमृतं जुहोमि ।

श्रद्धायामुदाने निविष्टोऽमृतं जुहोमि ।

श्रद्धाया७ं समाने निविष्टोऽमृतं जुहोमि ।

ब्रह्मणि म आत्माऽमृतत्वाय ॥ अमृतोपस्तरणमसि ॥

श्रद्धायां प्राणे निविष्टोऽमृतं जुहोमि । शिवो मा विशाप्रदाहाय । प्राणाय स्वाहा ।

श्रद्धायामपाने निविष्टोऽमृतं जुहोमि ।

शिवो मा विशाप्रदाहाय । अपानाय स्वाहा ।

श्रद्धायां ँव्याने निविष्टोऽमृतं जुहोमि । शिवो मा विशाप्रदाहाय ।

व्यानाय स्वाहा ।

श्रद्धाया–मुदाने निविष्टोऽमृतं जुहोमि ।

शिवो मा विशाप्रदाहाय । उदानाय स्वाहा ।

श्रद्धायाꣳ समाने निविष्टोऽमृतं जुहोमि । शिवो मा विशाप्रदाहाय ।

समानाय स्वाहा ।

ब्रह्मणि म आत्माऽमृतत्वाय ॥ अमृतापिधानमसि ॥ **90 (24)**

# अनुवाकं – 70

**T.A.6.70.1**

श्रद्धायां प्राणे निविश्याऽमृतꣳ हुतं । प्राण मन्नेनाप्यायस्व ।

श्रद्धायामपाने निविश्याऽमृतꣳ हुतं । अपान मन्नेनाप्यायस्व ।

श्रद्धायां ँव्याने निविश्याऽमृतꣳ हुतं । व्यान मन्नेनाप्यायस्व ।

श्रद्धाया–मुदाने निविश्याऽमृतꣳ हुतं । उदान मन्नेनाप्यायस्व ।

श्रद्धायाꣳ समाने निविश्याऽमृतꣳ हुतं ।

समान मन्नेनाप्यायस्व ॥ **91 (10)**

## अनुवाकं – 71

**T.A.6.71.1**

अङ्गुष्ठमात्रः पुरुषोऽङ्गुष्ठञ्च समाश्रितः ।

ईशः सर्वस्य जगतः प्रभुः प्रीणाति विश्वभुक् ॥ **92 (2)**

## अनुवाकं – 72

**T.A.6.72.1**

वाङ्म आसन्न् । नसोः प्राणः । अक्ष्यो–श्चक्षुः । कर्णयोः श्रोत्रं ।

बाहुवोर् बलं । ऊरुवो रोजः । अरिष्टा विश्वान्यङ्गानि तनूः ।

तनुवा मे सह नमस्ते अस्तु मा मा हि(ग्)ंसीः ॥ **93 (8)**

## अनुवाकं – 73

**T.A.6.73.1**

वयः सुपर्णा उपसेदुरिन्द्रं प्रिय मेधा ऋषयो नाधमानाः ।

अपद्ध्वान्त मूर्णुहि पूर्धि चक्षुर्–मुमुग्ध्यस्मान्

निधये ऽवबद्धान् ॥ **94 (2)**

## अनुवाकं – 74

**T.A.6.74.1**

प्राणानां ग्रन्थिरसि रुद्रो मा विशान्तकः ।

तेनान्नेना–प्यायस्व ॥ **95 (2)**

## अनुवाकं – 75

**T.A.6.75.1**

नमो रुद्राय विष्णवे मृत्युर्मे पाहि॥ **96 (1)**

## अनुवाकं – 76

**T.A.6.76.1**

त्वमग्ने द्युभि–स्त्वमाशु–शुक्षणि–स्त्वमद्भ्य–स्त्वमश्मनस्परि ।
त्वं ँवनेभ्य–स्त्वमोषधीभ्य–स्त्वं नृणां नृपते जायसे शुचिः ॥ **97 (2)**

## अनुवाकं – 77

**T.A.6.77.1**

शिवेन मे सन्तिष्ठस्व स्योनेन मे सन्तिष्ठस्व सुभूतेन मे सन्तिष्ठस्व
ब्रह्मवर्चसेन मे सन्तिष्ठस्व यज्ञस्यर्द्धि मनु सन्तिष्ठ स्वोप ते
यज्ञ नम उप ते नम उप ते नमः ॥ **98 (1)**

## अनुवाकं – 78

**T.A.6.78.1**

सत्यं परं पर॒ं सत्य॒ं सत्येन न सुवर्गा–ल्लोकाच्च्यवन्ते
कदाचन सता॒ं हि सत्यं तस्माथ् सत्ये **रमन्ते**, **(1)**

तप इति तपो नानशनात् परं ँयद्धि परं तपस्तद् दुधर्.षं
तद् दुराधर्.षं तस्मात् तपसि **रमन्ते**, **(2)**

दम इति नियतं ब्रह्मचारिण–स्तस्माद् दमे **रमन्ते,** (3)

शम इत्यरण्ये मुनय–स्तस्माच्छमे **रमन्ते,** (4)

दानमिति सर्वाणि भूतानि प्रश॒ꣳसन्ति दानान्नाति दुश्चरं
तस्माद् दाने **रमन्ते**, (5)

धर्म इति धर्मेण सर्वमिदं परिगृहीतं धर्मान्नाति–दुष्करं
तस्माद् –धर्मे **रमन्ते,** (6)

प्रजन इति भूयाꣳस–स्तस्माद् भूयिष्ठाः प्रजायन्ते तस्माद् भूयिष्ठाः
प्रजनने **रमन्ते**, (7)

ऽग्नय इत्याह तस्मा–दग्नय आधातव्या अग्निहोत्र–मित्याह
तस्मा–दग्निहोत्रे **रमन्ते,** (8)

यज्ञ इति यज्ञो हि देवा स्तस्माद् यज्ञे **रमन्ते**, (9)

मानस–मिति विद्वाꣳस–स्तस्माद् विद्वाꣳस एव मानसे
**रमन्ते,** (10)

न्यास इति ब्रह्मा ब्रह्मा हि परः परो हि ब्रह्मा तानि वा एतान्यवराणि
परा॑ꣳसि न्यास एवात्यरेचयद् य एवं ँवेदेत्युपनिषत् ॥ **(11) / 99 (1)**

## अनुवाकं – 79

**T.A.6.79.1**

प्राजापत्यो हारुणिः सुपर्णेयः प्रजापतिं पितर–मुपससार किं
भगवन्तः परमं ँवदन्तीति तस्मै **प्रोवाच,** **(1)**

सत्येन वायुरावाति सत्ये–नादित्यो रोचते दिवि सत्यं ँवाचः प्रतिष्ठा
सत्ये सर्वं प्रतिष्ठितं तस्माथ् सत्यं **परमं ँवदन्ति**, **(2)**

तपसा देवा देवता–मग्र आयन् तपसर्.षयः सुवरन्व–विन्दन् तपसा
सपत्नान् प्रणुदा–माराती स्तपसि सर्वं प्रतिष्ठितं तस्मात् तपः
**परमं ँवदन्ति**, **(3)**

दमेन दान्ताः किल्बिष–मवधून्वन्ति दमेन ब्रह्मचारिणः सुवरगच्छन् दमो
भूतानां दुराधर्.षं दमे सर्वं प्रतिष्ठितं तस्माद् दमः **परमं ँवदन्ति**, **(4)**

शमेन शान्ताः शिव–माचरन्ति शमेन नाकं मुनयो–ऽन्वविन्दन् छमो
भूतानां दुराधर्.षं छमे सर्वं प्रतिष्ठितं तस्माच्छमः **परमं ँवदन्ति**, **(5)**

दानं ँयज्ञानां ँवरूथं दक्षिणा लोके दातार७ सर्व भूतान्युपजीवन्ति दानेनाराती–रपानुदन्त दानेन द्विषन्तो मित्रा भवन्ति दाने सर्वं प्रतिष्ठितं तस्माद् दानं **परमं ँवदन्ति**, **(6)**

धर्मो विश्वस्य जगतः प्रतिष्ठा लोके धर्मिष्ठं प्रजा उपसर्पन्ति धर्मेण पाप–मपनुदति धर्मे सर्वं प्रतिष्ठितं तस्माद् धर्मं **परमं ँवदन्ति, (7)**

प्रजननं ँवै प्रतिष्ठा लोके साधु प्रजाया स्तन्तुं–तन्वानः पितृणा मनृणो भवति तदेव तस्या अनृणं तस्मात् प्रजननं **परमं ँवदन्त्य**, **(8)**

ग्नयो वै त्रयी विद्या देवयानः पन्था गार्.हपत्य ऋक्–पृथिवी रथन्तर –मन्वाहार् यपचनं ँयजुरन्तरिक्षं ँवामदेव्य माहवनीयः सामसुवर्गो लोको बृहत्–तस्मा–दग्नीन् **परमं ँवदन्त्य**, **(9)**

ग्निहोत्र७ सायं प्रातर्–गृहाणां–निष्कृतिः स्विष्ट७ सुहुतं ँयज्ञक्रतूनां प्रायण७ सुवर्गस्य लोकस्य ज्योति–स्तस्मा–दग्निहोत्रं **परमं ँवदन्ति**, **(10)**

यज्ञ इति यज्ञेन हि देवा दिवं गता यज्ञेनासुरा–नपानुदन्त यज्ञेन
द्विषन्तो मित्रा भवन्ति यज्ञे सर्वं प्रतिष्ठितं तस्माद् यज्ञं
**परमं ँवदन्ति,** **(11)**

मानसं ँवै प्राजापत्यं पवित्रं मानसेन मनसा साधु पश्यति मानसा
ऋषयः प्रजा असृजन्त मानसे सर्वं प्रतिष्ठितं तस्मान्
मानसं **परमं ँवदन्ति,** **(12)**

न्यास इत्याहुर् मनीषिणो ब्रह्माणं ब्रह्मा विश्वः कतमः
स्वयंभुः प्रजापतिः **सम्ँवथ्सर इति**, **(13)**

सम्ँवथ्सरो ऽसावादित्यो य एष आदित्ये पुरुषः स
परमेष्ठी **ब्रह्मात्मा,** **(14)**

याभिरादित्य–स्तपति रश्मिभिस्ताभिः पर्जन्यो वर्.षति पर्जन्ये–
नौषधि–वनस्पतयः प्रजायन्त ओषधि–वनस्पतिभि–रन्नं भवत्यन्नेन
प्राणाः प्राणैर् बलं बलेन तप–स्तपसा श्रद्धा श्रद्धया मेधा मेधया
मनीषा मनीषया मनो मनसा शान्तिः शान्त्या चित्तं चित्तेन स्मृति७

स्मृत्या स्मार७ स्मारेण विज्ञानं ँविज्ञाने–नात्मानं ँवेदयति तस्मादन्नं ददन्थ् सर्वाण्येतानि ददा–त्यन्नात् प्राणा भवन्ति भूतानां प्राणैर् मनो मनसश्च विज्ञानं ँविज्ञाना–**दानन्दो ब्रह्म योनिः,** **(15)**

स वा एष पुरुषः पञ्चधा पञ्चात्मा येन सर्वमिदं प्रोतं पृथिवी चान्तरिक्षं च द्यौश्च दिशश्चावान्तरदिशाश्च स वै सर्वमिदं जगथ्स सभूत७ं स भव्यं जिज्ञास क्लृप्त ऋतजा रयिष्ठा श्रद्धा सत्यो महस्वान् **तपसो परिष्ठाद्,** (वरिष्ठाद्) **(16)**

ज्ञात्वा तमेवं मनसा हृदा च भूयो न **मृत्यु–मुपयाहि विद्वान्** **(17)**

तस्मा–न्न्यास–मेषां तपसा–मतिरिक्तमाहुर्, **(18)**

वसुरण्वो विभूरसि प्राणे त्वमसि सन्धाता ब्रह्मन् त्वमसि विश्वधृत्ते–जोदास् त्वमस्यग्नि–रसि वर्चोदा–स्त्वमसि सूर्यस्य द्युम्नोदा स्त्वमसि चन्द्रमस उपयामगृहीतोऽसि ब्रह्मणे **त्वा महस,** **(19)**

ओमित्यात्मानं ँयुञ्जीतैतद्वै महोपनिषदं देवानां गुह्यं ँय एवं ँवेद
ब्रह्मणो महिमान–माप्नोति तस्माद् ब्रह्मणो
**महिमान–मित्युपनिषत्** ॥ **(20) / 100 (1)**

# अनुवाकं – 80

**T.A.6.80.1**

तस्यैवं ँविदुषो यज्ञस्यात्मा यजमानः–श्रध्दापत्नी शरीर–मिद्ध्ममुरो
वेदिर्–लोमानि बर्.हिर्–वेदः–शिखा हृदयं ँयूपः काम आज्यं
मन्युः पशु–स्तपोऽग्निर्–दमः शमयिता दक्षिणा–वाग्घोता **प्राण**
उद्गता चक्षुरध्वर्युर्–मनो ब्रह्मा श्रोत्रमग्नी–

ध्यावध्रियते सा दीक्षा यदश्नाति तध्दविर्–यत्पिबति तदस्य सोमपानं
ँयद्रमते तदुपसदो यथ् संचर–त्युपविश–त्युत्तिष्ठते च सप्रवर्ग्यो
यन्मुखं तदाहवनीयो या व्याहृति–राहुतिर्–यदस्य विज्ञानं तज्जुहोति
यथ्सायं प्रातरत्ति तथ्समिधं ँयत्प्रातर् मद्ध्यन्दिन७ं सायं च तानि
**सवनानि**

ये अहोरात्रे ते दर्.शपूर्णमासौ येऽर्द्धमासाश्च मासाश्च ते
चातुर्मास्यानि य ऋतवस्ते पशुबन्धा ये सँवथ्सराश्च परिवथ्सराश्च
तेऽहर्गणाः सर्व वेदसं वा एतथ् सत्रं यन्मरणं तदवभृथ

एतद्वै जरामर्य–मग्निहोत्र॑ँ सत्रं य एवं विद्वा–नुदगयने प्रमीयते
देवानामेव महिमानं गत्वाऽऽदित्यस्य सायुज्यं
गच्छत्यथ यो दक्षिणे प्रमीयते पितृणा–मेव महिमानं गत्वा चन्द्रमसः
सायुज्य॑ँ सलोकता–माप्नोत्येतौ वै सूर्या चन्द्रमसौर्–महिमानौ
ब्राह्मणो विद्वा–नभिजयति तस्माद् ब्रह्मणो महिमानमाप्नोति तस्माद्
ब्रह्मणो **महिमान–मित्युपनिषत्** ॥ **101 (1)**

सह ना ववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै ।
तेजस्विना वधीतमस्तु मा विद्विषावहै ॥

**ओं शान्तिः शान्तिः शान्तिः ॥**

**इति महानारायणोपनिषत् समाप्ता**

**Prapaataka Korvai with starting Padams of 1 to 80 Anuvaakams :-**

(अम्भस्यैकपञ्चाशच्छतं – जातवेदसे चतुर्दश – भूरन्नं – भूरग्नये – भूरग्नये चैकमेकं – पाहि – पाहि चत्वारि चत्वारि – यश्छन्दसां द्वे – नमो ब्रह्मणे – ऋतं तपो – यथा वृक्षस्यैक मेक – मणोरणीया॑ श्चतुस्त्रि॒ꣳशथ् – सहस्रशीष॒ꣳ षट्वि॒ꣳशति – रादित्यो वा एष – आदित्यो वै तेज एकमेकं – निधनपतये त्रयोवि॒ꣳशतिः – सद्योजातं त्रीणि – वामदेवायैक – मघोरेभ्य – स्तत्पुरुषाय द्वे द्वे – ईशानो – नमो हिरण्यबाहव एकमेक – मृत॒ꣳ सत्यं द्वे – सर्वो वै चत्वारि – कद्रुद्राय त्रीणि – यस्य वै कङ्कती – कृणुष्व पाजो – ऽदिति – रापो वा इद॒ꣳ सर्व मेकमेक – मापः पुनन्तु चत्वा – र्यग्निश्च – सूर्यश्च नव – नवोमिति चत्वा – र्यायातु पचौ – जोऽसि दशो – त्तमे चत्वारि – घृणिस्त्रीणि – ब्रह्ममेतु मां यास्ते ब्रह्महत्यां द्वादश – ब्रह्म मेधयाऽद्या न इमं भ्रूषहत्यां – ब्रह्म मेधवा ब्रह्मा देवानामिदं वीरहत्यामेकान्न वि॒ꣳशति रेकान्नवि॒ꣳशतिर् – मेधा देवी – मेधां म इन्द्रश्चत्वारि चत्वार्या – मां मेधा द्वे – मयि मेधा मेक– मपैतु – परं – वातं प्राण – ममुत्र

भूयाद् – द्धरि॑ – शल्कैरग्निं – मा छिदो मृत्यो – मा नो
महान्तं – मानस्तोके – प्रजापते – स्वस्तिदा – त्र्यम्बकं – यँये ते
सहस्रं द्वे द्वे – मृत्यवे स्वाहैकं – देवकृतस्यैकादश – यद्वो देवाः
– कामोऽकार्षीन् – मन्युरकार्षीद् द्वे द्वे – तिलाञ्जुहोमि गावः श्रियं
प्रजाः पञ्च – तिलाः कृष्णाश्चोरस्य श्रीः प्रज्ञातु जातवेदः
सप्त – प्राण वाक् त्वक् छिर उत्तिष्ठ पुरुष पञ्च – पृथिवी शब्द
मनो वाग् व्यक्ताऽऽत्माऽन्तरात्मा परमात्मा मे क्षुधेऽन्नमय
पञ्चदशा – ग्नये स्वाहैकचत्वारि॑ंश – दों न्तद्ब्रह्म नव –
श्रद्धायां प्राणे निविष्ट श्चतुर्वि॑ंशतिः – श्रद्धायां दशा – ङ्गुष्ठ मात्रः
पुरुषो द्वे – वाङ्म आसन्नष्टौ – वयः सुपर्णाः – प्राणानां ग्रन्थिरसि
द्वे द्वे – नमो रुद्रायैकं – त्वमग्ने द्युभिर् द्वे – शिवेन मे सन्तिष्ठस्व
– सत्यं – प्राजापत्य – स्तस्यैव मेक मेक मशतिः)

| Korvai with starting Padams of 1, 11, 21 Series of Dasinis :- |
| --- |
| (अम्भस्यपारे – स्वस्ति नः – पाहि नो अग्न एकया – ऽऽदित्यो वा एष – ऋतꣳ सत्य – मो मित्या – मां मेधा – मा नस्तोके – तिलाजुहोमि – श्रद्धायां प्राणे निविश्य – तस्यैव मेकोत्तरशतम्) |

==========================================

## Details of Dasini&Vaakyams for Prapaatakam6 (TA 6)

| | Dasini | Vaakyams |
|---|---|---|
| Anuvakam 1 | 15 | 151 |
| Anuvakam 2 | 1 | 14 |
| Anuvakam 3 | 1 | 1 |
| Anuvakam 4 | 1 | 1 |
| Anuvakam 5 | 1 | 1 |
| Anuvakam 6 | 1 | 4 |
| Anuvakam 7 | 1 | 4 |
| Anuvakam 8 | 1 | 2 |
| Anuvakam 9 | 1 | 1 |
| Anuvakam 10 | 1 | 1 |
| Anuvakam 11 | 1 | 1 |
| Anuvakam 12 | 3 | 34 |
| Anuvakam 13 | 2 | 26 |
| Anuvakam 14 | 1 | 1 |
| Anuvakam 15 | 1 | 1 |
| Anuvakam 16 | 2 | 23 |
| Anuvakam 17 | 1 | 3 |
| Anuvakam 18 | 1 | 1 |
| Anuvakam 19 | 1 | 2 |
| Anuvakam 20 | 1 | 2 |
| Anuvakam 21 | 1 | 1 |
| Anuvakam 22 | 1 | 1 |

| | | |
|---|---|---|
| Anuvakam 23 | 1 | 2 |
| Anuvakam 24 | 1 | 4 |
| Anuvakam 25 | 1 | 3 |
| Anuvakam 26 | 1 | 1 |
| Anuvakam 27 | 1 | 1 |
| Anuvakam 28 | 1 | 1 |
| Anuvakam 29 | 1 | 1 |
| Anuvakam 30 | 1 | 4 |
| Anuvakam 31 | 1 | 9 |
| Anuvakam 32 | 1 | 9 |
| Anuvakam 33 | 1 | 4 |
| Anuvakam 34 | 1 | 5 |
| Anuvakam 35 | 1 | 10 |
| Anuvakam 36 | 1 | 4 |
| Anuvakam 37 | 1 | 3 |
| Anuvakam 38 | 1 | 12 |
| Anuvakam 39 | 1 | 19 |
| Anuvakam 40 | 1 | 19 |
| Anuvakam 41 | 1 | 4 |
| Anuvakam 42 | 1 | 4 |
| Anuvakam 43 | 1 | 2 |
| Anuvakam 44 | 1 | 1 |
| Anuvakam 45 | 1 | 2 |
| Anuvakam 46 | 1 | 2 |

| | | |
|---|---|---|
| Anuvakam 47 | 1 | 2 |
| Anuvakam 48 | 1 | 2 |
| Anuvakam 49 | 1 | 2 |
| Anuvakam 50 | 1 | 2 |
| Anuvakam 51 | 1 | 2 |
| Anuvakam 52 | 1 | 2 |
| Anuvakam 53 | 1 | 2 |
| Anuvakam 54 | 1 | 2 |
| Anuvakam 55 | 1 | 2 |
| Anuvakam 56 | 1 | 2 |
| Anuvakam 57 | 1 | 2 |
| Anuvakam 58 | 1 | 1 |
| Anuvakam 59 | 1 | 11 |
| Anuvakam 60 | 1 | 2 |
| Anuvakam 61 | 1 | 2 |
| Anuvakam 62 | 1 | 2 |
| Anuvakam 63 | 1 | 5 |
| Anuvakam 64 | 1 | 7 |
| Anuvakam 65 | 1 | 5 |
| Anuvakam 66 | 1 | 15 |
| Anuvakam 67 | 4 | 41 |
| Anuvakam 68 | 1 | 9 |
| Anuvakam 69 | 1 | 24 |
| Anuvakam 70 | 1 | 10 |

| | | |
|---|---|---|
| Anuvakam 71 | 1 | 2 |
| Anuvakam 72 | 1 | 8 |
| Anuvakam 73 | 1 | 2 |
| Anuvakam 74 | 1 | 2 |
| Anuvakam 75 | 1 | 1 |
| Anuvakam 76 | 1 | 2 |
| Anuvakam 77 | 1 | 1 |
| Anuvakam 78 | 1 | 1 |
| Anuvakam 79 | 1 | 1 |
| Anuvakam 80 | 1 | 1 |
| Total → | 101 | 579 |